
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

७५

4391

नं ३६

॥अथरसमंजरीसटीकाप्रारंभहलं॥

Acc. NO. 4391. M-1546
Title - रसमञ्जरी सटीका. (टीका - रसिकमञ्जरी)
Author - भानुदत्त. (टीका. - गोपालभट्ट द्रविड)
Date - 1714 (शक or संवत् (?))
Subject - अलंकारशास्त्र.
folio - 44
Xerox - 89.

रसमं॰ १

श्रीगणेशाय नमः॥ ॥सानंदानंदवक्त्रो स्फुरदभिदुरसमामल्लवर्गेसरोषाः कंसेसभ्रातरिस्वप्रियसखसरसीजन्मभास्वत्स्वरूपाः॥ रक्षंतु नः स्त्रीसमेताश्च दतुलमहिमाः श्रीभरारंगभक्त्यौ कल्याणकल्पयंतां हरिहरधृतयो नैवलज्जाकटाक्षाः॥१॥ श्रीमद्गोपालभट्टेन द्रविडक्ष्मासुपर्वणा॥ क्रियते रसमंजर्याष्टीका रसिकमंजरी॥२॥ प्रारिप्सितरसमंजरीग्रंथनिर्विघ्नपरिसमाप्तये स्वेष्टदेवताभवौ वस्तुनिर्देशात्वेन दर्शयन् भानुनामा कविर्मंगलमाचरति॥ आत्मीयमिति॥ हरः शिवो जयतीत्यध्याहारः॥ यत्तच्छब्दावप्यध्याहार्यौ॥ यः प्रियतमां अंके दधानः सन् निम्नोन्नतायां भुवि नीचोच्चप्रदेशे पुरतोऽग्रतः आत्मीयं चरणं दधाति धारयतीत्यर्थः॥ प्रियायाः मृदुतरचरणकमलयोर्व्यथा नस्यादितिभावः॥

॥आत्मीयं चरणं दधाति पुरतो निम्नोन्नतायां भुवि स्वीयेनैव करेण कर्षति तरोः पुष्पं श्रमाशंकया॥

॥तल्पे किंच मृगत्वचा विरचिते निद्राति भागैर्निजैरंतःप्रेमरसालसः प्रियतमामंके दधानो हरः॥ १॥ सां॰

पुनस्तस्याः श्रमाशंकया तरोः पुष्पं स्वीयेनैव करेण कर्षति आहृत्य अवचिनोति॥ भूषणाधिर्दितिभावः॥ पुष्पमिति जातावेकवचनं॥ कांत्यासेवित इति वेति विशेषः॥ किंच अन्यदपि मृगत्वचा विरचिते तल्पे शय्यायां निजैर्भागैरेकदेशैर्निद्राति स्वपिति॥ निपूर्वोद्रा धातुः॥ शायनार्थे उपसर्गेण धात्वर्थो बलादन्यत्र नीयत इति वचनात्॥ कठोरमृगचर्मस्पर्शो नादति मृदुप्रियांगलतिकायाः पीडा न भवेदिति भीत्येतिभावः॥ कथंभूतः प्रियां॥ अंतःप्रेमरसालसोऽतः हृदये यत्प्रेम तस्य रसः आस्वादनं तेन अलसा निर्व्यापाराः अंतस्य यमेव हृतवानित्यर्थः॥ अंतः प्रेमरसालस इति पाठे एवंभूतस्यापि हरस्य तादृग्व्यापारकरणस्य प्रियतमामितिंचोबायां तुल्यकृष्टत्वं सूचितमित्यर्थः॥ निम्नगंभीरं गंभीरमित्यमरः॥ शार्दूलविक्रीडितं छंदः॥ लक्षणं॥

वि॰ वि६ मंगे॰

[illegible]

संप्रति ग्रंथकरणेप्रयोजनंनिरूपयति॥ विद्वदिति॥ श्रीमद्भानुना कविना एषा रसमंजरी रसः शृंगारादिः तद्युक्ता मंजरी प्रकाश्यते प्रकटीक्रियते॥ अन्यापि मंजरी भानुना सूर्येण प्रकाश्यत इति श्लेषः॥ किमर्थं विद्वज्जनस्य पंडितसमूहस्य मनः

स्तदेवभृंगस्तस्य यो रसव्यासंगः आस्वादसंबंधव्याप्तिः स एव हेतुस्तदर्थं॥ अनुष्टुप्छंदः॥१॥ प्रयोजनं निरूपयति॥ तत्रेति॥ तत्र तस्यां रसमंजर्यां रसेषु हास्यादिषु शृंगारस्य अभ्यर्हितत्वेन प्राधान्येन तदालंबनविभावत्वेन तस्य च शृंगारस्य आलंबनविभावत्वेन नायिका तावन्निरूप्यते॥ यमालंब्य रसमुत्पाद्यते स आलंबनो विभावः॥ विभावानुभावव्यभिचारिसंयो

विद्वत्कुलमनोभृंगरसव्यासंगहेतवे॥ एषा प्रकाश्यते श्रीमद्भानुना रसमंजरी॥१॥ तत्र रसेषु शृंगारस्याभ्यर्हितत्वेन तदालंबनविभावत्वेन नायिका तावन्निरूप्यते॥ ॥सा च त्रिविधा॥ ॥स्वकीया। परकीया सामान्या चेति॥ ॥तत्र स्वामिन्येवानुरक्ता स्वकीया॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥

गाद्रसनिष्पत्तिरिति भरतसूत्रं॥ तत्र विभावो द्विविधः॥ आलंबन उद्दीपनश्चेति॥ आलंबनो नायिकादिः॥ उद्दीपनो घनरव वोपवनादिः॥ नायिकानां बहुत्वाज्ज्ञातावेकवचनमात्रं समाधानं॥ सा च नायिका त्रिविधा॥ त्रिप्रकारैर्भिद्यत इत्यर्थः॥ त्रिप्रकारमाह॥ स्वस्येयं स्वकीया॥ स्वशब्दात्स्वार्थक इति प्रत्यये तदंतात् हादित्वाच्छः॥ आयनेय इति छस्य ईयादेशः॥ परस्येयं परकीया जनपराभ्यां कुक् छप्रत्ययौ॥ समानैव सामान्या सर्वसाधारणेत्यर्थः॥ तत्रेति॥ तत्र साधु स्वामिन्येव पतावेव अनुरक्ता अनुरागिणी॥ स्वकीया अनुरक्ता स्वकीया इत्युक्ते क्वचिदनुरक्ता या स्वकीया सा समायाति॥ अतः स्वामिन्येवेत्युक्तं॥

कदाचित्परागाभिमानिस्वामिनि कौतुकाद्यत्र कारोत्
वचसा स्वामिनेवेति॥

५परकीया

न्य४

रस·टी
२

नचेति परिणीतायां उढाहितायां परगामिन्यां न चाव्याप्तिः॥ अव्याप्तिलक्षणदूषणं न घटत इत्यर्थः॥ तथा हि॥ लक्ष्यैकदेशे लक्ष्यासमानमव्याप्तिः॥ अत्र स्वामिसंबंधिनी लक्षिता॥ तस्याएकदेशएवकाररूपश्चावधारणेन व्यावर्तितपदानुरूपैर्लक्ष्य लक्षणस्याप्रवर्तनरूपामव्याप्तिं प्रतिवादी कश्चिदनुसंदधाति सा न मंतव्या॥ यतः परगामिन्याः स्वत्वाल्लक्ष्यत्वात्॥ तदेवस्पष्टयति॥ अत्रेति॥ अत्रास्मिन् लक्षणे पतिव्रतायाः लक्ष्यत्वात्॥ नान्यस्याः स्वयोगव्यवच्छेदार्थः एवकारः॥ तस्याश्च परिणीतत्वेन स्वामिसंबंधिनीत्वं परगामितया त्वमपि समायाति॥ अतः पतिव्रतेत्युक्तं॥ सार्किव्यापारेत्याह॥ अस्याः स्वकीयायाश्चे

नच परिणीतायां परगामिन्याम व्याप्तिः॥ अत्र पतिव्रताया एव लक्ष्यत्वात्॥ तस्याश्च परगामितया परकीयात्वं समायाति॥ ॥अस्याश्चेष्टा॥ ॥भर्तुः शुश्रूषा। शीलसंरक्षणं। आर्जवं। क्षमा चेति॥ ॥यथा॥ ॥

मपि२

गतागतकुतूहलं नयनयोरपांगावधिस्मितं कुलनतभ्रुवामधरएव विश्राम्यति॥ वचः प्रियतमश्रुते रतिथिरेव कोपक्रमः कदाचिदपि चेत्तदा मनसि केवलं मज्जति॥३॥ ॥८॥ ॥८॥ ॥८॥ ॥

राम
२

ष्टव्यापारं स्तमेवाह॥ भर्तुरित्यादि॥ पत्युः शुश्रूषा परिचर्या॥ शीलस्य सद्वृत्तस्य संरक्षणं॥ आर्जवं॥ ऋजोर्भावः सरलत्वं॥ क्षमा शांतिः॥ शुचौ तु चरिते शीलं स्वभावे सद्वृत्ते रतिविश्वः॥ यथेति॥ तामेव चेष्टामुदाहरति॥ गतागतमिति॥ कुलनतभ्रुवां यः सदाचारवान् वंशः कुलमित्यभिधीयते॥ कुलसंबंधिनी स्यात्॥ न ते नम्रे भ्रुवौ यासां कुलनतभ्रुशब्देनात्र पतिव्रतागम्यते॥ तासां नयनयोः गतागतकुतूहलं गतं प्रेरणं आगतं आकुंचनं तद्विषये कुतूहलं कौतुकं॥ अपांगावधितत्परिछिन्नं। अपांगौ नेत्रयोरंतौ॥ कटाक्षोऽपांगदर्शनं स्मरः॥ पुनः स्मितं ईषद्धास्यं अधरएव विश्राम्यति॥ तदुल्लंघ्य न यातीत्यर्थः॥

ईषद्विकासि नेत्रैर्गण्डैः कटाक्षैः सोष्ठवाञ्चितैः ॥ अलक्षितद्विजद्वारं उत्तमानां स्मितं स्मृतम् ॥ पुनः वचो वचनं प्रियतमस्य श्रुते रेव एकस्य

थि२ कर्णस्य नद्वयोः रतिर्गोचरं ॥ नान्यस्येत्यर्थः ॥ पुनर्यदि कदाचित्कालविशेषेयाकोपक्रमः क्रोधारंभस्तदा मनस्येव उज्जति लीनो भवति ॥ केवलं२

न बहिर्यातीत्यर्थः ॥ स्वभावोक्तिरलंकारः ॥ स्वभावोक्तिस्तु पिंडादेः स्वक्रियारूपवर्णनमिति ॥ पृथ्वी छंदः ॥ तल्लक्षणं ॥ जसौ जस

जला वसुग्रहयतिश्च पृथ्वी गुरुः ॥ ३ ॥ स्वकीया च त्रिधा ॥ त्रिः प्रकारा ॥ मुग्धा मध्या प्रगल्भा चेति प्र[illegible]भेदेन ॥ तत्रेति स्त्रिविता सर्थः ॥ अंकु

राः संजाताः अस्येति अंकुरितं तच्च यौवनं तारुण्यं यस्याः सा मुग्धा ॥ अंकुरितमितितारकादित्वादितच् ॥ तां स्वरूपेण विभजते ॥ सा

१ यं चेति ॥ अज्ञातं स्मरवीजनेन स्वयं वा यौवनं स्वस्याः स्वं ज्ञातयौवनां अंकुरितयौवना अस्फुटस्फोटोभावेन विभज्यते ॥ तदुद्दिश्य

स्वकीया तु त्रिधा ॥ ॥ मुग्धा मध्या प्रगल्भा चेति ॥ ॥ तत्रांकुरितयौवना मुग्धा ॥ ॥ सा चाज्ञातयौवना ज्ञातयौवना

च ॥ ॥ सैव च क्रमशो लज्जाभयपराधीनरतिर्नवोढा ॥ ॥ सैव च क्रमशः सप्रश्रया विश्रब्धनवोढा ॥ ॥

र्थः ॥ तामेव पुनर्विशेषयन्नाह ॥ सैव चेति ॥ अज्ञातयौवना अंकुरितयौवना मुग्धैव क्रमशो यथाक्रमं अज्ञातयौवना ज्ञातयौव

डा२ ना ॥ लज्जा अधार्ष्ट्यं भयं सुरतस्योपरिचयेनाशंका ताभ्यां तत्प[illegible]राधीनात्तत्प्रधाने [illegible]तियावत् ॥ रतिः संभोगक्रीया[illegible]स्याः सौ

नवोढा ॥ नवसंभोगं प्राप्तायाप्यपि [illegible]तेत्यर्थः ॥ न च क्रमशः इत्यनेन विशेष्यविशेषणयोर्यथासंख्ये नज्ञातयौवना लज्जा

भयपराधीनरतिरित्याशंकनीयं ॥ तथात्वेव्यभिचारात्प्रत्येकमुभयव्यापारदर्शनात् ॥ तामेव व्यापारांतरेण विशेषयन्ना

ह ॥ सैव चेति ॥ क्रमशः लज्जाभयपराधीनरतिः ॥ अज्ञातयौवना ज्ञातयौवना क्रमेया[illegible]सप्रश्र[illegible]यो नम्रता अंगसं

कोचनमिति यावत् ॥ तत्सहिता विश्रब्धनवोढेत्युपदिश्यते ॥ ॥८॥ ॐ नमो भगवते वासुदेवायेति ॥ ॥८॥

रस॰टी॰
३

अस्या नवोढाया श्चेष्टा व्यापारः॥ क्रियाह्रियेति॥ क्रिया व्यापारस्तद्विषये या ह्रीः धार्ष्ट्यं ज्ञातया मह्यं नोरा॥ कोपे मार्दवं अल्पा पनेयत्वं॥ नवविभूषणेन नूतनालंकारे समीहा॥ मुग्धा यथा॥ अंकुरितयौवना स्वरूपं तावदुदाहरति॥ आज्ञप्तमिति॥ कामदेव धरणीपालेन कामश्चासौ देवश्च कामदेवः स एव धरणीपालो राजा तेन किंचिदिति स्मरणे निर्धारणे वा॥ आज्ञप्तं तारुण्यं सहाये न मंत्रिरूपेणाहमपि समस्तां जनं जेष्यामीति अवबोधितं॥ एतेन कामतारुण्ययोर्वैधुताव्यज्यते॥ तदेवाह॥ शुभे काले समयेता

अस्याश्चेष्टा॥ ॥क्रियाह्रियामनोहरा॥ कोपे मार्दवं॥ नवविभूषणेसमीहेति॥ ॥मुग्धा यथा॥ ॥आज्ञप्तं किल का मदेवधरणीपालेन काले शुभे वस्तुं वास्तुविधिं विधास्यति ननौ तारुण्यमेणीदृशः॥ दृष्टौ खंजनचातुरी मुखरुचा सौधाधरीमाधुरी वाचा किंच सुधासमुद्रलहरीलावण्यमामंत्र्यते॥४॥ ॥७॥ ॥७॥ ॥७॥

श्लो॰
राम
३

रुण्यं यौवनं कर्तृ एणीदृशो मृगनेत्रायास्तनौ गात्रे वस्तुं स्थातुं वास्तुविधिं विधास्यति करिष्यतीति हेतोरध्याहारः॥ दृष्टौ खं जनचातुरी मुखस्य रुचा कांत्या सौधाधरी सुधाधरश्चंद्रस्तस्येयं माधुरी सु वाचा सुधासमुद्रलहरीणां लावण्यमनोहरत्वं दृष्ट्यादिषु सर्वत्रामंत्रते॥ कामतारुण्याभ्यां स्थितिर्विधीयत इति भवद्भिरप्यागत्यात्र स्थातव्यमित्यकार्यलरस्यार्थ॥ लावण्यलक्षणं यथा॥ मुक्ताफलेषु छायाया या जायास्तारलत्वमिवांतरा॥ प्रतिभाति यदंगेषु तं लावण्यमिहोच्यते इत्यादि॥ शाईलविक्रीडितं वृत्तं॥४॥

श्य२ १पद

२ध्यां यो२ श्रोत्रे२

एवं सामान्यरूपां मुग्धयः संधि रूपेयो दाहरसं प्रत्येष्टधामुदाहरति॥ अज्ञातयौवने स्याह॥ नीरा तीरमिति॥ शशिमुखी चंद्रमुखी नायिका नीरात्तीरमुपागता समीपमागता श्रवणयोः सीम्नि मर्यादायां स्फुरंतीति नेत्रयोस्तयोः किमिदं उत्पलं लग्नं इति ज्ञातुं करं न्यस्यति नितरां क्षिपति॥ वामदक्षिण विभागेनेति भावः॥ आकांक्षापूरकत्वेनारूपो षकत्वा श्रोत्र इति नपौनरुक्त्यं॥ उत्पलं दृशोश्च तयोः समानधर्मत्वेन वितर्क इति भावः॥ किंच शैवालस्य जलनील्या अंकुरास्तेषां शंकया भ्रमेण समानगुणत्वात्॥ रोमावलिं रोमोद्गमपंक्तिं प्रोंछति स्पृशतीत्यर्थः॥ जलनीली तु शैवाल इत्यमरः॥ तथा अविदितो अज्ञातः श्रोणीभरो यया सा श्रांतास्मि भवामि॥ इति सखी

अज्ञातयौवना यथा॥ नीरात्तीरमुपागता श्रवणयोः सीम्नि स्फुरन्नेत्रयोः श्रोत्रे लग्नमिदं किमुत्पलमिति ज्ञातुं करं न्यस्यति॥ शैवालांकुरशंकया शशिमुखी रोमावलीं प्रोंछति श्रांतास्मीति मुहुः सखीमविदितश्रोणीभरा पृच्छति॥५॥ ॥ज्ञातयौवना यथा॥ ॥स्वयंभूः शंभुरंभोजलोचने त्वत्पयोधरः॥ नखेन कस्य धन्यस्य चंद्रचूडो भविष्यति॥६॥ ॥

मुहुः पृच्छति॥ संशयालंकारः॥ तथा च काव्यप्रकाशे॥ ससंदेहस्तु भेदोक्तौ तदनुक्तौ च संशयः॥ शार्दूलविक्रीडितं॥५॥ सखी ज्ञातयौवनामुदाहरति॥ स्वयंभूरिति॥ काचित्सखी सखीं प्रति हसंत्याह॥ हे अंभोजलोचने त्वत्पयोधरः पयोधरतीति स्तुच इत्यर्थः॥ यथाश्रुतव्याख्याने रसहानिप्रसंगः॥ स्वयंभूः स्वयं भवतीति॥ शंभुः शं सुखं भवति यस्मादिति कस्य धन्यस्य भाग्यवतः नखेन चंद्र इव चंद्रः चूडायां शिरसि यस्य भविष्यति शंभुरपि चंद्रचूडो भवति चंद्र इति चंद्रि आल्हादने तस्य धातोस्तेन आल्हादकत्वं व्यंजितं॥ चूडा इव चूडेति चूचुकोपरितननीलिमाध्वन्यते॥६॥ ॥६॥ ॥६॥ ॥

7

र.म.टी.
४

चं

सैवंक्रमराइति लक्षितां नवोढामुदाहरति॥ नवोढा यथा॥ हस्तो धृतापीति॥ हस्तो धृता न केवलं वागादिभिः रुद्धा यं शेते शय्यायां विनि
वेशिता न केवलं कराग्रवलंबिता क्रोडे भुजांतरे कृतापि आलिंगनादिव्यापारं प्रापिता न केवलं स्थापिता॥ तथापि नववधूः नवोढ
बहिरेव गंतुं नयं नेयत्नं करोति॥ लज्जाभयपराधीनत्वादिति भावः॥ अथ सर्वार्थान्तरे॥ जानीमहे वयं यः पुरुषः करेण पारदं स्थि
रयितुं स्थिरीकर्तुं क्षमते समर्थः॥ तस्य वश्या आक्रमणीया पारदाक्रमणमपि न रसज्ञेन भवतीति अत्रापि न तथैवार्थः॥ स्थिरयितु
मित्यत्रापि देशिकस्यानित्यत्वात् स्थिरस्यादेशाभावः॥ स्थगयितुमिति वा समीचीनः पाठः॥ अत्र स्वभावोक्त्यनुगतो दृष्टान्तालं
कारः॥ वसंततिलकं वृत्तं॥ ज्ञेयं वसंततिलकं तभजाजगौ गः॥७॥ विश्रब्धनवोढामुदाहरति॥ दरेति॥ नवोढा विश्रब्धेति शेष॥

नवोढा यथा॥ ॥हस्तो धृतापि शयने विनिवेशितापि क्रोडीकृतापि यतते बहिरेव गंतुं॥ जानीमहे नववधूः रथ तस्य
वश्यायः पारदं स्थिरयितुं क्षमते करेण॥७॥ ॥विश्रब्धनवोढा यथा॥ ॥दरमुकुलित नेत्रपालि नीवीनियमित
बाहूकृतोरुयुग्मबंधं॥ करकलितकुचस्थलं नवोढा स्वपिति समीपमुपेत्य कस्य यत्नः॥८॥ ॥७॥ ॥७॥

कस्य रसिकस्य समीपमुपेत्य मिलित्वा स्वपिति॥ कथमित्याह॥ दरं ईषन्मुकुलिते मुकुलीकृते नेत्रपाल्यौ यस्यां क्रियायां न यथा–
स्यात्तथा॥ ईषदर्थे दरा विस्मरः॥ अत्र लज्जिता दृष्टिर्नात्र मुकुलितस्य आनंदविधानात्॥ तथा सति मध्याप्रगल्भा स्वभावे
न मुग्धा नाम संभवात्॥ नाप्यर्धमुकुला सुखविशेषेण एतस्याम संभवात्॥ नापि भीता भीतायां दृष्टो मुकुलितत्वमित्यसंप्र
दाय इत्यलं विस्तरेण॥ पुनर्नीवी नियमित बाहू नीव्यां नियमितः स्थापितो बाहुर्यया कृतं ऊरुयुग्मबंधः परस्परं लग्नं ताय
त्रतथा॥ करेण कलितं कुचस्थलं यत्र करे कलितं धृतं कुचस्थलं यत्र॥ स्वभावोक्तिरलंकारः॥ नारीकटपं शुकग्रंथौ नीवी
ग्रंत२

पा॰

स्यादिति वैजयंती॥ पुष्पिताग्रावृत्तं॥ तल्लक्षणं॥ अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा॥८॥

अथ मध्यामाह॥ समानौ तुल्यबलतया लज्जामदनौ यस्याः सा समानलज्जामदना॥ एषैव चातिप्रश्रयेति विश्रब्धनवोढा इत्यपि पाठः॥ अनुदाहृतत्वात् असंभवाच्च हि अतिधार्ष्ट्याभाववतीति तस्यां कथं धार्ष्ट्यप्रयुक्तवक्ष्यमाणमध्याव्यवहारसंभव इति॥ अस्याः मध्यायाः चेष्टाक्रियाव्यापारः॥ सागसीति॥ सागसि सापराधे प्रेयसि कान्ते सति धैर्ये धीरत्वे वक्रोक्तिः॥ अर्थान्तरज्ञापकं वचनमित्यर्थः॥ अधैर्ये अधीरतायां परुषा निष्ठुरा वाक् यस्याः सा॥ मध्यां यथा उदाहरति॥ स्वापइति॥ स्वापे निद्रायां प्रियाननविलोकनहानिः विलोकनरूपेष्टसंभोगवती इत्यर्थः॥ तस्याः स्वापच्युतौ निद्रात्यागे प्रियकरस्य ग्रहणप्रसंगः॥ इत्यर्थे चेष्टायेति भावः॥

समानलज्जामदना मध्या॥ ॥एषैव चातिप्रश्रया इति विश्रब्धनवोढा॥ अस्याश्चेष्टा॥ सागसि प्रेयसि धैर्ये वक्रोक्तिरधैर्ये परुषा वागिति॥ ॥यथा॥ ॥स्वापे प्रियाननविलोकनहानिरेव स्वापच्युतौ प्रियकरग्रहणप्रसंगः॥ इत्थं सरोरुहमुखी परिचिंतयंती स्वापं विधातुमपि हातुमपि प्रपेदे॥१॥ ॥पतिमात्रविषयकेलिकलापकोविदा प्रगल्भा॥ ॥वेश्यायां कुलटायां च पतिमात्रविषयत्वाभावान्न तत्रातिव्याप्तिः॥ ॥अस्यास्तु रतिप्रीतिरानंदात्संमोहः॥ ॥७॥ ॥

इत्थं अमुना प्रकारेण सरोरुहमुखी परिचिंतयंती स्वापं निद्रां विधातुं कर्तुं लज्जात्यागस्य दुःकरत्वादिति भावः॥ हातुं त्यक्तुमपि कान्तमुखावलोकहानेरनुपेक्षत्वादिति भावः॥ प्रपेदे प्राप्ता॥ उभयकोट्यवलंबनानिष्टकार्यद्वयसमानयत्नेन व्याकुला बभूवेत्यर्थः॥ अत्र विधानहानाभ्यां तुल्यबलतया लज्जामदनतुल्यवर्णनेन प्रगटमेव लक्षणमुदाहरणस्वरूपं॥ अत्र च हानविधानयोरन्यतरानिश्चयाभावेन संदेहालंकारः॥ वसंततिलकं वृत्तं॥१॥ अथ प्रगल्भां निरूपयति॥ पतिमात्रेति॥ पतिमात्रविषये यः केलिकलापः क्रीडासमूहः॥ तत्र कोविदा प्रवीणा प्रगल्भा॥ वेश्यायां च पुनः कुलटायां स्वैरिण्यां पतिमात्रविषयत्वस्याभावान्न तत्र तयो वेश्याकुलटयो रतिव्याप्तिः॥ अलक्ष्ये लक्षणगमनमतिव्याप्तिः॥ अस्याः प्रगल्भायाः रतिः प्रीतिः अन्यापेक्षया संभोगप्रीतिः आनंदात्सं

रस·टी·
५

थाउ दयर

प्रथमं रति प्रीतिरुदाहरणं दर्शयति॥ संस्पृश्येति॥ वामाक्षी वामं वक्रं अक्षि यस्याः कुटिलतापिकरुत्कमलादिदक्षयेति भावः॥ वसनां-
चलैः वक्रत्वोत्स्याप्रयत्नेनापिनाच्छादितं भवतीति ध्वन्यते॥ श्रवणयोर्नीलोत्पलं कमलं सूर्योदये विकासित्वात् निन्हुते आच्छादयति॥
कमलविकासननिन्हेन सूर्योदयं प्रियो मा जानीदिति धियेति भावः॥ अंबुजिनीपतेर्देवस्य सूर्यस्य समुदयं जिज्ञासमाने ज्ञातुमि-
च्छति सति अंबुजिनीपतेरिति तत्सनाथत्वाचास्या इति भावः॥ सूर्योदयं जिज्ञासमान इति रतेरंतरायभूतो दिवा संभोग इति भावः॥
न दिवा मैथुनं कुर्यादिति वाक्यात्॥ किं कृत्वा जिज्ञासमाने प्रिय इत्यत आह॥ स्तनं संस्पृश्य मर्दनं विधाय आकंठं अपि स्वमुखे चुंबनार्थं सं-

निष्पीड्य प्रथमं यथा॥ ॥संस्पृश्य स्तनमाकलय्य वदनं संश्लिष्य कंठस्थली निष्पीड्याधरबिंबमंबरमपाकृष्य व्युदस्या-
लकान्॥ देवस्यांबुजिनीपतेः समुदयं जिज्ञासमाने प्रिये वामाक्षी वसनांचलैः श्रवणयोर्नीलोत्पलं निन्हुते॥१०॥

योज्येत्यर्थः॥ कंठस्थलं संश्लिष्य आलिंग्य एतदालिंगनं दुग्धजलाभिधानं जघनोपश्लेषाख्यं वा अवगंतव्यं॥ उक्तं च॥ अंके
शायने २ स्थितापि मृगशावकाक्षी गात्रे प्रियस्य विशती वनितांतरागात्॥ गाढोपगूढनवशेन निरंतरं यत्संश्लेषमाकुरिह दुग्धजलाभि-
धानं॥ उरकलितस्तादीयश्रोणिरस्योपरिष्टाद्रजयति इह नारी स्त्रस्तकेशोत्तरीया॥ करजघनकृतैश्चुंबनं वा विधित्सुः कथयति
जघनोपश्लेषमेतन्मुनींद्र इति॥ तथा॥ अधरबिंबं निष्पीड्य पानं इत्यस्य स्वत्यपि रूपांतरं बरं अपाकृष्य दूरीकृत्य अलका-
न्व्युदस्य उत्क्षिप्य एवं बाह्यरतेन आलिंगनादिना यिकामुक्तं दयितेत्यर्थः॥ उक्तं च॥ मोहनं नारभेताव धावन्नोक्तं हि ताप्रिया॥ अ

वाउ

आनंदात्संमोह इति॥ द्वितीयमुदाहरणं दर्शयति॥ नखक्षतमिति॥ काचिन्नायिका स्वंकृतं विशिक्षां सखीं कथयति॥ हे आलि सखि उरस्थले वक्षसि नखक्षतं। अधरदले अधराधःप्रदेशे रदस्य दंतस्य व्रणं। तल्ल स्वरूपाधरयोरिति विश्वः॥ बकुलमालिका बकुलवृक्षस्य पुष्पं बकुलं तस्य मालेव मालिका च्युता इतस्ततः पतिता। पुनः मुक्तावली विगलिता मुक्ताहारस्त्रुटित इत्यर्थः॥ प्रागल्भ्यप्रयुक्तसुरतवैचित्र्यमुभयतोपि हेतुरिति भावः॥ एतन्नखक्षतादि सकलं रतांतसमये सुरतांतकाले आनंदभरत्वेपि मया अवलोकितं ईषद्दृष्टं अयमहमिति विशेषस्मरणं क्वेत्यर्थः॥ रतिः क्व च विशेषसंभोगः क्व च न स्मरामीत्यर्थः॥ तत्र च न वशिक्षा वि

द्वितीयं यथा॥ ॥नखक्षतमुरस्थलेऽधरदलेदंऽरस्य व्रणं च्युता बकुलमालिका विगलिता च मुक्तावली॥
रतांतसमये मया सकलमेतदालोकितं स्मृतिः क्व च रतिः क्व च क्व च न वालि शिक्षा विधिः॥१३॥ ॥मध्या
प्रगल्भे मानावस्थायां प्रत्येकं त्रिविधे॥ ॥धीराऽधीरा धीराधीरा चेति॥

धिनीयके एवं व्यवहर्तव्यमेवं नेति रतिविशेषविवेकः क्व च किमपि न जानामीत्यर्थः॥ इत्थं कियंतं कालं संभोगमात्रस्मृतौ सुरतवैचित्र्यमनंतरं च तदभावे अतिसंमोह इति प्रगल्भायां रतिवैचित्र्यसंमोहो अवगंतव्यः॥ अन्यथा प्रियसंस्पर्शे एवातिसंमोहे कदा सुरतवैचित्र्यं स्यात्तदभावे च रसहानिप्रसंगः॥ अतस्तदुभयमपि युज्यत इति भावः॥ पृथ्वी छंदः॥ १३॥ इत्थं निरूपितेषु स्वीया मुग्धादिभेदेषु मध्याप्रगल्भाभेदांतरैरनेकविधैरित्याह॥ मध्याप्रगल्भेति द्वे॥ मानावस्थायां मानप्रधाने द्वे प्रत्येकं त्रिविधे॥ मध्याप्रगल्भे त्रिप्रकारे इत्यर्थः॥ तान्प्रकारान्दर्शयति॥ धीरा धैर्यवती॥ अधीरा अधैर्यवती॥ धीराधीरा धैर्याधैर्यवती॥ ॥

६

तत्र धीरां दर्शयति॥व्यंगेति॥व्यंग्यो अनुमेयः केनचित् चिन्हेन कोपस्य प्रकाशो यस्याः सा धीरा॥न व्यंग्यः कोपप्रकाशो यस्याः सा अधी
रा॥व्यंग्याव्यंग्यो कोपप्रकाशो यस्याः सा धीराधीरा॥इयांस्तु विशेषः॥इदमेव चिन्हं॥मध्याधीरायाः कोपस्य व्यंजिका गीर्वक्रवच
नं यस्याः कोपव्यक्तिरित्यर्थः॥मध्याया अधीरायाः अधैर्यवत्याः परुषा निष्ठुरा वाक् कोपस्य व्यंजिकेति शेषः॥मध्याधीराधीरा
याः धैर्याधैर्यवत्याः वचनं धीरत्वयोगे॥रुदितं अश्रुविमोचनं॥अधीरत्वयोगितउभे एककालिन इति शेषः॥कोपस्य प्रका
शिके॥प्रगल्भायामपि तथैवेत्याह॥प्रौढायाः प्रगल्भायास्तु धीरायाः रतौ दास्यं सुरतो दासीनत्वं कोपप्रकाशमिति योज्यं॥वा

तत्र व्यंग्यकोपप्रकाशिका धीरा॥अव्यंग्यकोपप्रकाशिका अधीरा॥व्यंग्याव्यंग्यप्रकाशिका धीराधीरा॥ ॥इयांस्तु विशे
षः॥ ॥मध्याधीरायाः कोपस्य गीर्व्यंजिका॥अधीरायाः परुषवाक्॥धीराधीरायाश्च वचनरुदिते प्रकाशिके॥प्रौढाधी
रायास्तु रतौ दास्यं॥अधीरायास्तर्जनताडनादि॥धीराधीरायाः रतौ दास्यं तर्जनताडनादि च कोपस्य प्रकाशकं॥यत्तु॥
धीरादिभेदः स्वीयायामेव न तु परकीयायामिति प्राचीनलेखनं तदाज्ञामात्रं॥धीरत्वमधीरत्वं तदुभयं वा माननियतं॥

ज्ञास्यात् षोडशाब्दात् तदुपरि तरुणी त्रिंशति यावदूर्ध्वं प्रौढा स्यात् पंचपंचाशदब्दं परतो वृद्धतामेति नारी तिरतिरहस्ये॥प्र
गल्भाधीरायास्तु तर्जनं वाग्नेत्रशिरःकंपादिभिः॥ताडनादि ताडनं पुष्पमालादिना॥आदिना तद्बंधनमपि॥प्रगल्भाधी
राधीरायाः रतौ दास्यं सुरतो दासीनत्वं॥तर्जनताडनादिके कोपस्य प्रकाशिके पूर्ववत्॥एवं धीरादिभेदा नुक्ता प्रास्तं
गिकात्परमतमनूद्य निराकरोति॥धीरादिभेदाः स्वीयाया एव न तु परकीयाया इति प्राचीनलेखनं नैतत् लिखितं॥आज्ञा
मात्रं न विचारणीयं॥यतः धीरत्वमधीरत्वं तदुभयं धीराधीरत्वं माननियतं मानाधीनं॥ ॥७॥ ॥७॥ ॥७॥

प्रसक्ते किमायातं तत्राह॥ परकीयायां मानश्चेन्न दाते षामपि धीरादीनामपि आवश्यकत्वान्निश्चितं भवतीत्यर्थः॥ मानः परकीया
यां न इति वक्तुमशक्यत्वात्॥ तत्र मध्यामुदाहरति॥ लोलेति॥ काचित्सापराधं प्रियं प्रत्याह॥ भो प्रिय भवतो देहे श्रमवारिधाराः
श्रमजलकणाः स्फाराः बभूवुः॥ जाता इत्यर्थः॥ कथंभूतस्य भवतः॥ लोलालिपुंजे व्रजतः लोलानां चंचलानां सतृष्णानां वा अ
लीनां भ्रमराणां पुंजः समूहो यस्मिन् भवदंगसौगंध्यमाघ्रायेत्यर्थः॥ तस्मिन्निकुंजे व्रजतो गच्छतः॥ अतः नलिन्याः कमलिन्याः

परकीयायां मानश्चेन्नेषां आवश्यकत्वात्॥ मानश्च परकीयायां नेति वक्तुमशक्यत्वात्॥ ॥मध्याधीराय
था॥ लोलालिकुंजे व्रजतो निकुंजे स्फारा बभूवुः श्रमवारिधाराः॥ देहे समीहे भवतो विधातुं धीरं समीरं नलिनीदले

दलेन तस्यातिशीतलत्वात्॥ समीरं वायुं धीरं मंदं श्रमपरिहरणाक्षमं मिलत्यर्थः॥ विधातुं कर्तुं समीहे इच्छामि॥ लोलश्चलस
तृष्णयोरित्यमरः॥ मां विहाय निकुंजे व्रजत इति वक्रोक्त्या सापराधत्वं॥ अत्र वक्रोक्तिरलंकारः॥ वक्रोक्तिश्लेषकाकुभ्यां वा
च्यार्थांतरकल्पनमिति॥ इंद्रवज्रावृत्तं॥ स्यादिंद्रवज्रा यदि तौ जगौ गः॥ १२॥ ॥७॥ ॥७॥ ॥७॥

रसमं॰टी॰
७

ति२ राधौ

मध्यांधीरामुदाहरति॥ जात इति॥ कामिनी सापराधं कांतं वदति॥ हे धूर्त अति चित्रमेतत् । दाकर्ण्यतामित्याह॥ तेतव निशि जागरो जागरणं जातः मदन्यनायिकारतिवशादिभावः॥ मम पुनर्नेत्रांबुजे शोणिमा शोणस्य भावः रक्तत्वं तदसहनत्वादमर्षग्रहणोत्थभावः॥ यस्य जागरस्तन्नेत्रे रक्तत्वं युक्तं॥ अत्र तु विपर्यय इति चित्रं पुनर्भवता त्वया भवितं मधु मद्यं निष्पीतं नितरां पीतं मदन्यासत्या हे स्यर्थः॥ मे मनो व्याघूर्णितं भ्रांतं चित्रमेतत्॥ पुनः भ्राम्यतो ये भृंगास्तैर्वने निबिडे निकुंजभुवने लतागृहे त्वया श्रीफलं श्रीफलं स्यबिल्वतृक्षस्य फलं अवयवस्य रूपं फलं प्राप्तं मदन्यस्याः कुचलक्षणफलमिति ध्वनितं॥ अविवक्षितवाच्योयस्तत्रवा

मध्याअधीरायथा॥ ॥ जातस्ते निशि जागरो मम पुनर्नेत्रांबुजे शोणिमा निःपीतं भवता मधु प्रवितितं व्याघूर्णितं मे मनः॥ भ्राम्यद्भृंगघने निकुंजभवने लब्धं त्वया श्रीफलं पंचेषुः पुनरेष मां वक्रतरैः क्रूरैः शरैः हंतति॥१३॥

राम
७

च्यंभवेध्वनौ॥ पाणो षधि वृक्षेभ्यश्च समरः॥ फले पुल्लुगिनिलुक्॥ यद्वा श्रियस्तस्या यौवनसंपत्तेः फलमिव फलं कुचरूपं तत्संभोगादिवा॥ पुनः इदं चित्रं॥ एषः पंचेषुः पंच इषवो बाणाः यस्य सः कामः मां हु नव होन्निस्तद्वक्रतरैः दीर्घकैः शरैः हंतति घिनत्ति॥ फलं त्वया प्राप्तं छेदनं मम मेति वैपरीत्यमित्यर्थः॥ हर्षणाश्च प्रहसनो मोहनो मूर्छनस्तथा विरूपणाश्च कामस्य बाणाः पंच प्रकीर्तिताः॥ यद्वा॥ अरविंदमशोकं च चूतं च चंपककोरकं॥ नीलोत्पलं च पंचैते पंच बाणस्य सायकाः॥ एते नस्य यं फलं प्राप्य अहं पुष्पैः प्रतारिताइत्यर्थः॥ अत्र विरोधालंकारः॥ विरोधः सोऽविरोधोपि विरुद्धत्वेन यद्वचः इति॥ रसार्णवि

रसमंजरी टीका

14

नो

मध्यां धीराअधीरां मुदाहरति॥ कांतानुरागेति॥ काचिद्वदति॥ भो कांत अनुरागो अनुरंजनं तत्र चतुरोसि॥ यद्वा॥ कांतायां मदन्य
स्याः अनुरंजन केवलं अनुरंजने चतुरः किंतु मनोहरोसि॥ तस्यामस्माकं च मनोहरोसीति वक्रोक्तिः॥ तस्या मा सक्तेः॥ न केवलं इदमेव॥ ना
थोसि प्रभुरसि पुंडुतापकोसीति वक्रोक्तिः॥ नाथ नाथ्यया श्रीोपतापऐश्वर्यादिषु॥ किंच नवयौवने नभूषितोसि॥ इदमेवन॥ वि
नयादिति वक्रोक्तिः॥ सुदृशा नायिकया इत्थं इत्ता निगद्य उक्त्वा प्रियस्य वदने विषये सप्तमी॥ निश्वस्य बाष्पैर्नेत्रांबुभिर्लुलिता विम
र्दिता दृगंताः दृक्कोणाः निहिताः प्रेरिताः॥ अत्र वक्रोक्त्या स्पष्टतया मध्याधीराधीरत्वं स्पष्टमेव॥ वसंततिलकं छंदः॥ १४॥ प्रौढां धीरा

मध्याधीराअधीरा यथा॥ ॥ कांतानुरागचतुरोसि मनोहरोसि नाथोसि किंच नवयौवनभूषितोसि॥ इत्थं निगद्य सु
दृशा वदने प्रियस्य निःश्वस्य बाष्पकुलिता निहिता दृगंताः॥ १४॥ ॥ प्रौढाधीरा यथा॥ ॥ नो तल्पं भजसे न जल्पसि सु
धाधाराऽनुकारा गिरो दृक्पातं कुरुषे न वा परिजने कोपानुबंधच्छलात्॥ इत्थं केतकगर्भगौरि दयिते कोपस्य सं
गोपनं तल्पादेव न चेत्पुनः सहचरी कुर्वन्त साचिस्मितं॥ १५॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

मुदाहरति॥ नो तल्पमिति॥ काचित्सखी वदति॥ हे केतकगर्भगौरि॥ केतक्याः पुष्पं केतकं तस्य गर्भस्तद्वद्गौरि तल्पं शय्यां नो
भजसे न तथा सुधाधारानुकाराः सुधाधारां अनुकुर्वंतीति ताः अमृतद्रवतुल्या इत्यर्थः॥ गिरो वाचो न जल्पसि॥ उभ
यमपि क्रोधोदयादिति भावः॥ तथा कोपप्रकाशस्य छलात् व्याजात् परिजने दृक्पातं न कुरुषे॥ इत्थं एवं दयिते प्रिये
तत्कोपस्य संगोपनं आच्छादनं स्यादेव॥ चेद्यपि पुनः सहचरी सह चरतीति सखी साचिवक्रं मुखं कृत्वेत्यर्थः॥ स्मितं न कुर्या
त्॥ एवमुदासितायां त्वयि चाटुवचनादि कुर्वतो वल्लभस्य सखी साचिस्मितमेव तत्कोपव्यापकमभूदित्यर्थः॥ साचि त्वर्थे जु

15

रस·मं·टी·
९

अधीरा
प्रौढामुदाहरति॥प्रतिफलमिति॥अचलकन्यापार्वती गिरीशं गिरिं पश्यति तत्र कलेति स्वतेजसा एवंभूतईश्वरं करेण तर्जयामास॥चि
त्रमेतत्॥ किंभूता पार्वती॥ हरस्य शिवस्य शिरसि या इंदोः कला तस्यां स्वीयं प्रतिफलं प्रतिबिंबं अवलोक्य परस्या अन्यस्या वा संभ्रि
त्रमेतत्॥ किंभूता पार्वती॥ हरस्य शिवस्य शिरसि या इंदोः कला तस्यां स्वीयं प्रतिफलं प्रतिबिंबं अवलोक्य परस्या अन्यस्या वा संभ्रि
तिं आशंकमानो वितर्कयंती॥ किंभूतेन करेण कंपनेन प्रचलानि चंचलानि कंकणानि तेषां वल्गा तीभाषमाणाया कांतिः शोभा तां
भजतीति तेन भाजा सेवमानेन॥ अन्योपि यथाहं ध्वनिपूर्वेण तर्जयति तथेत्यर्थः॥ अत्र संशयालंकारः मालिनी वृत्तं॥ तल्लक्षणं॥
ननमयययुतेयं मालिनी भोगिलोकैः॥१६॥ प्रौढां धीराऽधीरामुदाहरति॥ तल्पोपांतमिति॥ प्रियतमे तल्पोपांतं तल्पस्य शय्याया
प्रौढा अधीरा यथा॥ ॥प्रतिफलमवलोक्य स्वीयमिंदोःकलायां हरशिरसि परस्या वा समाशंकमाना॥ गिरिशमचल
कन्या तर्जयामास कंपप्रचलवलयवल्गत्कांतिभाजा करेण॥१६॥ ॥प्रौढा धीराऽधीरा यथा॥ तल्पोपांतमुपेयु
षि प्रियतमे वक्रीकृतग्रीवया काकुव्याकुलवाचि सा विहसितस्फूर्जत्कपोलश्रिया॥ हस्तं न्यस्तकरे पुनर्मृगदृ
शा लाक्षारसक्षालितप्रोष्ठीपृष्ठमयूखमांसलरुचो विस्फारिता दृष्टयः॥१७॥ ॥७॥ ॥७॥ ॥७॥
उपांतं समीपं उपेयुषि प्राप्तवति वक्रीकृतग्रीवया सापराधस्यास्य सन्मुखं स्थितिर्नेभवितेतिभावः॥ पुनः काकुव्या कु
लवाचि॥ काकाम अपराधं ज्ञात्वा कुपिते तिभीतयुतध्वनिविकारेण व्याकुला अन्यथा कथनेन वा कूयस्य तस्मिन् सति सा
स्थितिर्यथ भूत्वा यत् हसितं॥ कथमपराधगोपनं काका करोतीति हासः॥ तेन स्फूर्यतिविकसति कपोलयोः श्रीर्यस्याः सा तया॥
पुनः हस्तो न्यस्तः करो येन तस्मिन् सति यदियं हसंती लक्ष्यते॥ अतः प्रसन्नेति ज्ञात्वा मृगदृशा दृष्ट्यो दृष्टिभेदास्तदा तदा परा
धसूचकरूपाः विस्फारिताः सक्रोधप्रकाशं प्रेरिताः॥ किं दृष्टय॥ लाक्षारसेन यावकेन क्षालितं यत् प्रोष्ठ्याः शर्कर्याः पृ
ष्ठं तस्य ये मयूखाः कांतिच्छटास्तद्वन्मांसलाः पृथुलाः रुचयो [illegible]स्तयोयासां ताः॥ काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेः॥ इ
दी

द्विपरकीयास्तुसा

वयः२

एवंधीरादिषड्भेदानुक्त्वा तामपि प्रकारांतरेणाह॥ एतेपि षड्भेदाम् ध्याप्रौढा विषयाः द्विविधाः द्विप्रकारका द्विप्रकारेणाभिद्यंत इत्यत आह॥ ज्येष्ठाकनिष्ठाचेति॥ परिणीतत्वे सति इति भर्तुः स्नेहकृतज्येष्ठाकनिष्ठात्वं॥ न तु कृतमिति॥ तत्र स्नेहतारतम्येन अधिकस्नेहास्वित्यादिनातिव्याप्तिः॥ तासां अपरणीतत्वादिति भावः॥ धीराज्येष्ठाकनिष्ठायथा॥ तथोदाहरति॥ एकस्मिन्निति॥ कोपि दक्षिणनायिक इति योज्यं॥ सरोरुहदृशोर्नायिकयोरेकस्मिन् शयने शय्यायां निद्रां विज्ञाय॥ तयोर्मध्ये एकां नायिकां तर

एते च धीरादिषड्भेदाः द्विधा॥ ॥ज्येष्ठाकनिष्ठाच॥ ॥परिणीतत्वे सति भर्तुरधिकस्नेहा ज्येष्ठा॥ परिणीतत्वे सति भर्तुर्न्यूनस्नेहा कनिष्ठा॥ अधिकस्नेहासु न्यूनस्नेहासु मान्यवनितासु नातिव्याप्तिः॥ परिणीतपदेन व्यावर्तनात्॥ ॥धीराज्येष्ठाकनिष्ठायथा॥ ॥एकस्मिन् शयने सरोरुहदृशोर्विज्ञाय निद्रां तयोरेकां पल्लवितावगुंठपटामुत्कंधरो दृष्टवान्॥ अन्यस्याः सविधं समेत्य निभृतव्यालोलहस्तांगुलिव्यापारैर्वसनांचलं चपलयन् स्वापच्युतिं कृतवान्॥१८॥ ॥ ॥ ॥ ॥ ॥ ॥ नर

पल्लवितां विस्तारितां॥ अवगुंठनपटो यस्यास्तां व्यापारैः प्रेरणारूपैः वसनस्य अंचलं प्रति चालयन्॥ स्वापच्युतिं निद्राकुं कृतवान्॥ तया सह रिरंसया तथा कृतवानित्यर्थः॥ [illegible] अत्र पूर्वार्द्धे रत्यौत्सुक्याभावेन न्यूनस्नेहत्वेन कनिष्ठात्वं॥ उत्तरार्धे रत्यौत्कंठ्यात् स्नेहाधिक्यं स्फुटमिति॥ शार्दूलविक्रीडितं वृत्तं॥१८॥ ॥श्री॥ हलस्म॥ त्वं२

×तुल्यत्वेलितेषु :मोइच्छतिडुतिमियाउत्कंधरः दृष्टवान्॥ अन्यस्याः ज्येष्ठायाः सविधं समीपं समेत्य आगत्य निभृतं व्यालोलाश्चंचलाः याः हस्तांगुल्यस्तासां ×२

र.म.टी.
१

अधीराजेष्ठाकनिष्ठा च यथा उदाहरति॥ अंतर् ति॥ कोपि दक्षिणः नायिक इति शेषः॥ घने कानने रतिकेलियोगे निबिडवने प्रियतमे पश्यन्॥ किंभूते॥ अंतःकोपकषायिते॥ अंतर्मनसि यः कोपस्तेन कषायिते कलुषीकृते॥ तत्र तयोर्मध्ये एकां नायिकां पुष्पस्य अवचयाय आत्रोटनाय नम्रवदनां समायोजयत्॥ पुष्पावचयव्याजेन नम्रमुखीं कुर्वन्निस्यर्थः॥ अन्यां ज्येष्ठां नववधूं नवयौवनां नायिकां समालिंगति॥ किंभूतां अन्यां॥ अर्धोन्मीलिते ये लोचने तयोर्येऽंचले कोणौ ये तेर्यश्चमत्का-

अधीराज्येष्ठाकनिष्ठा यथा॥ ॥अंतःकोपकषायिते प्रियतमे पश्यन्घने कानने पुष्पस्यावचयाय नम्रवदनामेकां समायोजयत्॥ अर्द्धोन्मीलितलोचनांचलचमत्काराभिरामाननां स्मेराद्रधरपल्लवां नववधूमन्यां समा[लिंगति]

रास
१

रास्तैरभिरामं आननं यस्याः सा तां॥ अत्रार्धमुकुला दृष्टिर्यथा॥ अर्धव्याकोपिते किंचिद्रम्यं सौतारके स्फुटीय सार्धमीलितौ सार्द्धमुकुलार्थे स्फुरवप्रदे॥ पुनः स्मेरे अ[र्थ] यस्मिन् एवंभूतो अधरपल्लवो यस्याः सा तां॥ अत्रापि पूर्ववत्॥ पूर्वाधोत्तरार्धयोः कनिष्ठज्येष्ठाविभाग॥ शार्दूलविक्रीडितं॥ ३९॥ ॥६॥ ॥७॥ ॥८॥ ॥८॥ ॥६॥
ई

धीराधीराज्येष्ठाकनिष्ठायथाउदाहरति॥धैर्याधैर्येति॥प्रियःकांतःएणीदृशोर्मुष्टिहृदयेअनंतकांत्यारुचिरंरत्नद्वयंन्यस्तवान्॥
किमर्थंप्रीतयेतयोरेवेत्यर्थः॥धैर्यंअधैर्यंचधैर्याधैर्येतयोःपरिग्रहेणगृहितयोःधैर्याधैर्ययुक्तयोरित्यर्थः॥गृहेरोणादि
कइलच्प्रत्ययस्तेनगृहीतइतिसाधनीयं॥किंतुप्रथमतःएकस्याःकनिष्ठायाःकरेरत्नंकलयन्ग्राहयन्॥परस्याःअन्यस्याः
ज्येष्ठायाःहस्ताहस्तीत्यव्ययं॥हस्तेनहस्तेनहस्तोहस्तेवागृहीत्वाइदंयुद्धंप्रवर्त्ततइत्यस्मिन्नर्थेतन्मिषात्॥व्याजात्कुचतटीं
स्पृशन् आनंदंआविंदति॥अनुभवति॥अत्रस्फुटएवज्येष्ठाकनिष्ठेउदाहरणात्रयेपिछलमलंकारः॥छलमन्यानुरोधे

धीराऽधीराज्येष्ठाकनिष्ठायथा॥ ॥धैर्याधैर्यपरिग्रहप्रहितयोरेणीदृशोःप्रीतयेरत्नद्वंद्वमनंतकांतिरुचिरंमु
ष्टिहृदयेन्यस्तवान्॥एकस्याःकलयन्करेप्रथमतोरत्नंपरस्याःप्रियोहस्ताहस्तिमिषात्स्पर्शान्कुचतटीमानंदमा
विंदति॥२०॥ ॥अप्रकटपरपुरुषानुरागापरकीया॥ ॥साचद्विविधा॥ ॥परोढाकन्यकाच॥ ॥कन्यायाःपि
त्राद्यधीनतयापरकीयता॥अस्याःसकलैवचेष्टागुप्ता॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

नसमुदाहरिष्यप्रकाशनमिति॥शार्दूलविक्रीडितं॥२०॥इत्थंउक्तरीत्यास्वकीयांनिरूपयति॥अप्रकटेति॥अप्रकटःकोपिनजाना निरूपयि क्रिया॥
लुइतिभीत्यापरस्मिन्पुरुषेअनुरागोयस्याःसापरकीया॥अप्रकट पुरुषानुरागेत्युक्तेमुग्धायामतिव्याप्तिः॥अतउक्तं
परपुरुषेति॥प्रकटपुरुषानुरागेत्युक्तेवेश्यायांअतोअप्रकटेति॥साचद्विविधाद्विःप्रकारा॥परेणअन्येनऊढापरिणीता
कन्यकाच॥ननुपरोढायाःभर्त्राद्यधीनत्वेनपरकीयत्वंउक्तं कन्यकायास्तुकथमित्याह॥कन्यकायाइति॥अन्याधीन
त्वमेवपरकीयात्वेप्रयोजकमितिभावः॥साकिंस्वभावास्यादित्याह॥अस्याःसकलाचेष्टागुप्तैव॥अन्यानवलोकितेत्यर्थः॥२०॥

रसमं॰टी
१०

सुधा॰ छा ख्या ३

परोढायथो॰दाहरति॥ अयमिति॥ काचित् … कामिनी सखीभंग्यंतरेणाह॥ हे सखि कुसुमशरः कामस्तस्य सेवायै आराधना
यसमुचितो योग्यः अयं विद्यमानः रेवाकुंजः रेवानदीतत्संबंधी कुंजः लतायावृतदेशः॥ अर्थपोषकत्वादध्याहरोयमप्यध्या
हर्तव्यः॥ उक्तं च॥ येनाप्नोति परां भूमिं पदं गुंफे विधायता॥ तदव्ययं समादेयं पद्यव्याविचक्षणैरिति॥ किं च वेलायां यथा
कालं॥ यद्वा कुंजमर्यादायां तत्प्रांत इति यावत्॥ वेला कालमर्यादयोरपीत्यमरः॥ दरईषद्विमलं सौविकसंसोएला
एलापुष्पाणि फलानि वा तासां परिमलस्तत्संबंधलब्धो गंधविशेषो यस्मिन्॥ नवेति पाठे न॰ बोअभिनबो विदलदेला

नव

परोढायथा॥ ॥अयं रेवाकुंजः कुसुमशरसेवासमुचितः समीरोयं वेलादरविदलदेलापरिमलः॥ इयं प्रावृ
ट् धन्या नवजलदविन्यासचतुरा पराधीनं चेतः सखि किमपि कर्तुं मृगयते॥२९॥ ॥श्रीरामो जयति॥

राम
१०

परिम… लोयत्रेत्यर्थः॥ एवंभूतोयं अनुभूयमान इत्यर्थः॥ समीरो वायुर्वर्तत इ…ः ति शेषः॥ अत एव समीरपतिः काममिति समीर
इत्यर्थः॥ विमर्दोत्थे परिमलो गंधे इत्यमरः॥ किं च नवजलदविन्यासेन नवीनमेघरचनायां चतुरा अत एव धन्या भर्तुरिहानयन
रूपमदुपकारत्वेन पुण्यवती इयं पुरो विलसंती प्रावृट् वर्षाकालः मां आनंदयतीति शेषः॥ इयमिति स्त्रीत्वेन सखी त्वं ध्वन्यते॥
हे सखी चेतश्चित्तं पराधीनं परस्मिन्पुरुषे अधीनं तत्कृपावशीकृतेन तत्प्राप्त्याद्दामाम वस्त्यं प्राप्तां किमपि तत्संगमोपायरूपं कृ
त्यं कर्तुं मृगयते अन्विष्यति॥ शिखरणीवृत्तं॥ तल्लक्षणं॥ रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी॥२९॥ ॥७॥ ॥

परोढायाः गुप्तादिभेदैर्वैरूप्ये कथं द्विधेत्याशंक मानं प्रत्युत्तरमाह ॥ गुप्तेत्यादि ॥ तत्रापि गुप्ता त्रिविधा ॥ त्रिःप्रकारा ॥ त्रैविध्यमेव
दर्शयति ॥ वृत्तसुरतगोपने इत्यादिना ॥ त्रितयमपियथा तथोदाहरति ॥ एकेनैव पद्येन ॥ श्वश्रूरिति ॥ कापि परपुरुषचिन्हानिति
कुर्वाना सखीं वदति ॥ हे सखि श्वश्रूः क्रुध्यतु ॥ सुहृदो विद्विषन्तु ॥ अथ वायातरः भ्रातृभार्याः निंदंतु ॥ तद्वचनाकर्णनेन क्रोधादि
हेतुरितिभावः ॥ भार्याः स्युः भ्रातृवर्गस्य यातरः स्युः परस्परमित्यमरः ॥ किंतु तस्मिन्मंदिरे ताभिरदृष्टे गृह इत्यर्थः ॥ पुनः अन्य
वारं मया स्वापो निद्रा नैव विधेयः कर्तव्यः ॥ स्वापविधाने हेतुमाह ॥ आखोर्मूषकस्य आक्रमणाय ग्रहणाय कोणकुहराव
  गुप्ताविदग्धा लक्षिता कुलटा अनुशयाना मुदिता प्रभृतीनां परकीयायामेवान्तर्भावः ॥ ॥ गुप्तात्रिविधा ॥ ॥
  वृत्तसुरतगोपना वर्तिष्यमाणसुरतगोपना वृत्तवर्तिष्यमाणसुरतगोपना चेति ॥ ॥ त्रितयमपियथा ॥ ॥ श्व
  श्रूः क्रुध्यतु विद्विषन्तु सुहृदो निंदंतु वा यातरस्तस्मिन् किंतु न मंदिरे सखि पुनः स्वापो विधेयो मया ॥ आखोरा
  क्रमणाय कोणकुहरादुत्फालमातन्वती मार्जारी नखरैः खरैः क्षतवती कां कां न मे दुर्दशां ॥ २२ ॥ ॥८०॥
गृहप्रान्तदेशात् उत्फालं आतन्वती कुर्वती मार्जारी बिडाली खरैर्नखरैः मे मम कां कां दुर्दशां विडंबनां न क्षतवती अपितु
दुर्दशा क्षता स्यात् वशात् तैवास्तीतिभावः ॥ एतेन वृत्तवर्तिष्यमाणपरपुरुषसुरतसंगोपनं छद्मना कृतमिति ॥ अत्र व्या
जोक्तिरलंकारः ॥ व्याजोक्तिः शंकमानस्य छद्मना वस्तुगोपनमिति ॥ उंदुरुर्मूषकोप्याखुः नखोस्त्री नखरोस्त्रि
यामित्यमरः ॥ शार्दूलविक्रीडितं ॥ २२ ॥ ॥ श्रीरामजयराम जयजयराम ॥ श्रीकृष्ण जयकृष्ण जयजयकृष्ण ॥ ॥

[illegible]

विदग्धा द्विविधा द्विःप्रकारा ॥ वाग्विदग्धा क्रियाविदग्धा दिभेदेन ॥ प्रथमा यथा ॥ तत्र वाग्विदग्धामुदाहरति ॥ निबिडतमेति ॥ कापि स्वसंकेतमुपदिशन्त्याह ॥ हे पथिक अद्य तीव्रे सवितरि सति त्वयैम ध्यान्हे इत्यर्थः ॥ सरित्तटे नदीतीरे तव निवासो वसतिः समुचितो योग्यः ॥ किंभूते सरित्तटे ॥ निबिडतमेति ॥ अतिशयेन निबिडा निबिडतमा ये तमालास्तमालवृक्षास्तान् मल्लुअन्ते वलंबन्ते इति मल्लुन्यः ॥ मल्लुठ धृताविति धातुः ॥ ताश्च ता वल्लयश्च लताविचकिलाश्च मल्लिप्रभेदास्तेषां राजयः पंक्तयस्ताभि र्विराजितो उपकंठः समीपप्रदेशो यस्य तस्मिन् ॥ तथा वहिर्विराजितउपकल्पस्य समीपे अर्थात् मम वक्षस्थलेन वनिवा

विदग्धा च ... द्विविधा ॥ वाग्विदग्धा क्रियाविदग्धा च ॥ ॥ प्रथमा यथा ॥ ॥ निबिडतमतमालमल्लिवल्ली विचकिलराजिविराजितोपकंठे ॥ पथिक समुचितस्तवाद्य तीव्रे सवितरि तत्र सरित्तटे निवासः ॥ २३ ॥ ॥ क्रियाविदग्धा यथा ॥ ॥ दासाय भवननाथे वदरीमपनेतुमादिशति ॥ हेमंते हरिणाक्षी पयसि कुठारं विनिक्षिपति ॥ २४ ॥ ॥

सोयोग्यः ॥ इति वा वैदग्ध्यं सूचितं ॥ अस्मिन् पक्षे राज्यं तपदं ॥ राज्यत इति राट् तस्मिन् संस्मृतो विचकलो मल्ली प्रभेदे मदनेपि केति विश्वः ॥ पुष्पिताग्राछंदः ॥ २३ ॥ क्रियाविदग्धामुदाहरति ॥ भवननाथे गृहस्वामिनि दासायसेवकाय बद[illegible]र्वृक्षविशेषं अपनेतुं छेत्तुं आदिशति आज्ञापितेसतीत्यर्थः ॥ हरिणाक्षी चपलनेत्रा संकेतवियोगभीतेति भावः ॥ हेमंते ऋतौ तत्र पानीयस्यातिशीतलत्वादिति भावः ॥ पयसि जले कुठारं विनिक्षिपति गोपायतीत्यर्थः ॥ तेन क्रियावैदग्ध्यं ॥ अत्र कुठारगोपनेन वस्तुनास्य चौर्यपासंकेतगोपनं रूप ध्वनिः ॥ कर्कंधुर्वदरी कोलिरित्यमरः ॥ आर्याभेद उपगीतछंदः ॥ तल्लक्षणं ॥ आर्यापरार्धतुल्ये दलद्वये प्राहुरुपगीतं ॥ २४ ॥

रूपवर

शें

लक्षितायथातथोदाहरति॥ यद्भूतमिति॥ कापिसखीवदति॥ यद्भूतं अनुष्ठितं तद्भूतं यातमेवेत्यर्थः॥ जातस्य वाक् सहरुपाय्य
निवर्त्तनादितिभावः॥ यत्नु अरिष्टं भूयात् रुद्द रूपअवश्यंभावित्वादितिभावः॥ तदपि अरिष्टं भूयात्॥ सम्यकृतया स्वीक्रियतइ
त्यर्थः॥ अथवा य इद्भवति तद्भवतु नविलंबतामित्यर्थः॥ कोपितवर्गोपनायासो गोपनविषये कृप्रयत्नो विफलो निष्फलइत्य
आर्याछंद ६: र्थः॥ लक्षितत्वादितिभावः॥ २७॥ कुलटामुदाहरन्नाह॥ एतइति॥ काचित्कुलटा वदति॥ एते अंभोधरा मेघाः वारिकणान् उज
लबिंदून् किरंति विक्षिपंति॥ तदयुक्तमित्याह॥ यतः पुरुषान् जारान् वर्षंति॥ अतो उपयोगिन इतिभावः॥

लक्षितायथा॥ ॥यद्भूतं तद्भूतं यद्भूयात् तदपि वा भूयात्॥ यद्भवति तद्भवतु वा विफलस्तु वर्गोपनायासः॥ २५॥ कुलटा
तिर यथा॥ ॥एतेवारिकणान् किरंति पुरुषान् वर्षंति नांभोधराः शैलाः शाद्वलमुद्गमंति न सृजंत्येते पुनर्नायकान्॥ त्रैलो
के तरवः फलानि सुवते नैवारभंते जनान् धातः कातरमालपामि कुलटा हेतोस्त्वया किं कृतं॥ २६॥ ॥२७॥

आर[illegible] ॥ किंच शैलाः पर्वताः शाद्वलं तृणं उद्गमंति प्रगटयंति॥ शिलोच्चयत्वाद्रूक्षणिका इति भावः॥ यत एते पु का २
नर्नायकान् जनान् न सृजंति॥ अपिच तरवो वृक्षाः परोपकारिणो त्रैलोक्ये त्रिष्वपि लोकेष्वित्यर्थः॥ फलानि सुवते उत्पादयं
ति॥ अस्मद्भाग्यविपर्ययेण कल्पवृक्षादयोप्यकारणिका जाता इतिभावः॥ यतः जारान् जनान् नैव आरभंते नोत्पादयं
तीत्यर्थः॥ अतः हे धातर्ब्रह्मन् त्वया विश्वसृजा कुलटाहेतोः स्वैरिण्यर्थे किं कृतं न किंचिदपि कृतमित्यर्थः॥ जाराणां
विरलप्रचारत्वादितिभावः॥ अतः कातरं यथास्यात्तथा॥ उपालंभं वदामीत्यर्थः॥ शार्दूलवि[illegible]डितं॥ २६॥

मेकं

प्रत्येकं एकां मेकां प्रति प्रत्येकमुदाहर
अनुशयानामुदाहरति॥ सापि चेष्टाविशेषेण त्रिःप्रकारेत्याह॥ वर्त्तमानस्थानेत्यादिना॥ प्रत्येकमुदाहरन्नाह॥ समुपागतवतीति॥ शिवशि
णानि अनुक्रमेणानि स्पृशामपीत्यर्थः॥ तत्र वर्त्तमानस्थानविघट्टनेनानुशयाना॥ मुदाहरन्नाह॥ समुपागतवतीति॥ शिवशि
वेति खेदे॥ शोभननयनायाः कपोलपाली गंडस्थली तालीदलस्य ताली वृक्षपत्रस्य द्युतिं पांडुरकांतिं लेभे श्वासवती संकेतस्था
नविघटनेन विषादेनेति भावः॥ हसतिलवंगलतिकायाः संकेतरूपायाः लतेवल्लतको पकपायाकनूं॥ यत्र पातेन दीनेच दृश्यत
इतियुक्तं॥ तस्या अनुकं पार्थे॥ तस्याः निपतितानि पत्राणि यस्मिन् तस्मिन् चैत्रे मासि स्वसंकेतकनाशके समुपागतवति मास
अनुशयानाय था॥ ॥वर्त्तमानस्थानविघट्टनेन॥ भाविस्थानाभावशंकया॥ स्थानधिष्ठितसंकेतस्थलं भर्तुर्गमिनानु
मारेण चानुशयाना भवति॥ ॥प्रत्येकमुदाहरणानि॥ ॥समुपागतवति चैत्रे निपातितपत्रे लवंगलतिकायाः॥ सुद
शाः कपोलपाली शिव शिव तालीदलद्युतिं लेभे॥२७॥ निद्रालुकेकिमिथुनानि कपोतपोतव्याधूतनूतनमही
ह पल्लवानि॥ तत्रापि तन्वि नवनानि किं यंति संतिरविघस्व न प्रियतमस्य गृहं प्रयाहि॥२८॥ ॥श्री कृष्ण॥
ह पल्लवानि॥ तत्रापि तन्विन वनानि कियंति संति रविघस्वन प्रियतमस्य गृहं प्रयाहि॥२७॥ भाविस्थानाभावशंकयाअ
नुशयि॥ आर्याभेदो प्रगीतिश्छंदः॥ तल्लक्षणं॥ आर्याप्रथमार्धसमं यस्यामपरार्धमाहतां गीतिं॥२७॥ भाविस्थानाभावशंकयाअ
नुशयनामुदाहरति॥ निद्रालुकेकीति॥ काचित्स्वसखी चौर्यरतसंकेतप्राप्तमपश्यंती माश्वापयती वदति॥ हे तन्वि हे कृशांगि न
रविघस्य रवेदंनप्राप्नुहि॥ तत्रापि प्रियवसंतौ कियंति वनानि न संति किं लुब्धकूनि संतीत्यर्थः॥ अतः प्रियं मस्य गृहं याहि श्रा
मुहि॥ किं भूतानि वनानि॥ निद्रालवो निद्राशीलाः ये केकिनः प्रशंसायामिलिः॥ प्रशस्ता केका वाणी येषां ते बर्हिणास्तेषां मिथु
नानि स्त्रीपुंसरूपाणि एषु तानि एतेन जनसंचरणाराहित्यं केकी केत्यनेन घनघनस्यमेघोदयः ध्वन्यते॥ पुनः कपोतानां पक्षिवि

रा३

शेषाणां पोताः बालकास्तैर्व्याधूताः कठकजनाधर
पल्लवादिधननं ध्वन्यते॥ व्याजोक्तिरलंकारः॥ वसंतति

स्वेन आत्मना अनधिष्ठितं यत्संकेतस्थलं तस्मिन्नूतस्य गमनानुमाने यातिरिक्तो अनुरायानां प्राह॥ कर्णकल्पितेति॥ राधया मधुरिपुः छद्मः निरीक्ष्यते दृश्यते॥ किं तया निष्पतंती गलंती नयनाभ्यां वारिधारा यस्यास्तया छलं संकेते अनेनागतं म यानागतमिति विषादादिति भावः॥ किंभूतो मधुरिपुः कर्णकल्पिता या रसालमंजरी अहमागतस्त्वं नागतेति राधा विश्वासार्थं संकेता म्रमंजरीं तान्ती छलं कपोलमंडलं गंडस्थलं यस्य सः॥ पिंजरं पीतनं ताल मालं च हरितालं मित्यमरः॥ रथोद्धतछंदः॥ तल्लक्षणं॥

पिंजरीकृतं४

कर्णकल्पितरसालमंजरीपिंजरीकृतकपोलमंडलः॥ निःपतन्नयनवारिधारया राधया मधुरिपुर्निरीक्ष्यते ॥२९॥ ॥मुदिता यथा॥ ॥गोष्ठेषु तिष्ठति पतिर्बधिरा ननांदा नेत्रद्वयस्य च न पाटवमस्ति यातुः॥ इत्थं निशम्य तरुणी कुचकुंभसीम्नि रोमांचकंचुकमुदंचितमाततान॥३०॥ ॥८॥ ॥८॥ ॥८॥ ॥८॥

त्यापरैर्नरगलै रथोद्धतां॥२८॥ मुदिता यथा तथोदाहरति॥ गोष्ठे ष्विति॥ काचित्स्वगृहे वासयितुमिच्छति पथिकं वदति। पतिर्भर्ता गोष्ठेषु गोनिवासस्थानेषु तिष्ठति। अहर्निशमिति भावः॥ ननंदा भर्तृभगिनी बधिरा च॥ पुनः यातुः भ्रातृभार्यायाः पाटवं पटोर्भावः आरोग्यमिति यावत् नास्ति अंधेत्यर्थः॥ इत्थं अमुना प्रकारेण पथिकं प्रति संकेतोपगर्भ सखी वचनं निशम्य श्रुत्वा तरुणी नायिका कुचकुंभयोः सीम्नि प्रदेशे रोमांच एव कंचुकं उदंचितं ऊर्ध्वगतं आततान॥ मया अयं पांथः उपभोग्यः इत्यानंदात्

भर्तर
नेत्रद्वय

ख्सारयति स्वर्गी॥ कर्णेतालक ८२॥

परकीयां प्रदर्श्य कन्यकामुदाहरन्नाह॥ कन्यकायथेति॥ किंचिदिति॥ नृपकन्यका राजकन्यका सुदृतिनंपुण्यपर्वंनं सव्याजंय
थास्यात्तथा किमपि व्याजमाश्रित्येत्यर्थः॥ धार्ष्ट्याभावादिति भावः॥ आकेलोनेकामाधीनतया विलोकयतीत्यर्थः॥ किंभूता
राजकन्यका स्फुरंती अंगुलीयकानां मुद्रिकानां कांतिर्यस्यां तया अंगुल्या गंडस्य कपोलस्य कंडूयनं कुर्वाणा॥ कथं विलो
कयतइत्याह॥ किंचित्कुंचिता तिर्यक्कृरणादिति भावः॥ हारयष्टिर्हारलता यस्यां क्रियायां तद्यथास्यात्तथा॥ पुनःसरले अनु

कन्यकायथा॥ ॥ किंचित्कुंचितहारयष्टिसरलभ्रूवल्लीसाचिस्मितं भ्रांतभ्रांतविलोचनद्युतिभुजा
पर्यस्तकर्णोत्पलं॥ अंगुल्यास्फुरदंगुलीयकरुचा कर्णस्य कंडूयनं कुर्वाणा नृपकन्यका सुकृतिनं सव्या
जमालोकते॥ ३१॥

टिलेसाभिलाषावलोकनेनेति भावः॥ भ्रूवल्ल्यो भ्रूलते यत्र क्रियायां तथा॥ किंच॥ साचि तिर्यक् विस्मितं यथास्यात्तथा॥ अ
न्यायदेशेनेति भावः॥ किंच भ्रांतेभ्रांत विलोचनयोर्द्युतिः कांतिर्यत्र क्रियायां तथा॥ मन्नेत्रैर्मन्नेत्रे यथा न गच्छ[illegible]त्युयमि
ति [illegible]॥ भुजां गुडकमिति माघे॥ अतः स्त्रीलिंगेपिभुजाशब्दः॥ कर्णस्य कंडूयनं कुर्वाणा॥ ३१॥ ॥५०॥ ॥५०॥
१ भीत्ये[illegible]त्यर्थः॥ भुजाभ्यां पर्यस्तं यतितं कर्णोत्पलं यत्र क्रियायां तद्यथा[illegible] कीम[illegible] वशात्तया कपोलकंडूयनादिभावः॥ १
यथा २

एवंपरोढांनिरूप्यसामान्यवनितांनिरूपयति॥वित्तमात्रेति॥वित्तमात्रोपाधिकः सकलपुरुषाभिलाषोयस्याः सावित्तोपाधिके त्युक्तेपरकीयायामतिव्याप्तिः॥यस्याः कदाचिद्वित्तोपाधिप्रवृत्तित्वात् अतोमात्रेति॥यद्येवंइहाव्याप्तिरित्याशंकमानमाह॥नन्विति॥अग्निमित्रेक्षितिपतौराज्ञि अनुरक्तायां ऐरावत्यांवेश्यायां अव्याप्तिः॥लक्षणस्याप्रवर्तमानमित्यर्थः॥तत्रलस्यांवित्तमात्रोपाधेरभावादितिचेन्न उच्यतेइतिशेषः॥मैवंएवंमावक्तव्यं॥सापिऐरावतीकाश्मीरहीरादीनांदातरिमहाराजेअनुरक्तानतुमहर्षौ तेनअवगम्यतेज्ञायते॥तत्रापिवित्तमेवोपाधिरितिभावः॥ ॥सामान्यवनितायथातथोदाहरति॥दृष्ट्वेति॥
वित्तमात्रोपाधिकसकलपुरुषाभिलाषासामान्यवनिता॥ ॥नन्वग्निमित्रेक्षितिपतौ अनुरक्तायामैरावत्यामव्याप्तिः॥तत्रवित्तमात्रोपाधेरभावादितिचेन्न॥मैवं॥सापिकाश्मीरहीरादिदातरिमहाराजेऽनुरक्तानतुमहर्षौ॥ते नअवगम्यतेतत्रापिवित्तमात्रोपाधिरिति॥ ॥सामान्यवनितायथा॥ ॥दृष्ट्वाप्रांगणसन्निधौबकुलं(?)रं दातारमभ्या गतंवक्षोजौतनुतःपरस्परमिवाश्लेषंकुरंगीदृशः॥आनंदाश्रुपयांसिमुंचतितमुंडुमौलामिषात्कुंतलोदृष्टिःकिं चषधनागमं कथयितुंकर्णांतिकंगच्छति॥५१॥ ॥६०॥ ॥६०॥ ॥६०॥ ॥६०॥ ॥६०॥ ॥६०॥ ॥६०॥ ॥

धनं

कुरंगीदृशोमृगनेत्रायाः वक्षोजौस्तनौपरस्परंआश्लेषमिवआलिंगनंतनुतः कुरुतइत्यर्थः॥किंकृत्वाप्रांगणसन्निधौचत्वरसमीपेबकुधनंयस्यतंदातारंअभ्यागतंदृष्ट्वाविलोक्य॥किंच॥कुंतलाः कचाःसंतिअस्मिन्सकुंतलः पतत्वेनेतिकुंतलोधम्मिल्लः॥अयदिमस्योअन्यच्चस्थयः॥मालायाःमिषात्व्याजात्आनंदोहर्षःधनप्राप्तेरितिभावः॥तेनअश्रुपयांसिअश्रुबिंदूनिवविसृजति॥आनंदाश्रुणांस्वच्छत्वात्पुष्पसाम्यं॥धनागमंधनप्राप्तिंकथयितुंकर्णांतिकंकर्णसमीपंगच्छति॥धनागमानंदादितिभावः॥
शार्दूलविक्रीडितं॥३२॥

हि

एवं स्वीया परकीया सामान्यवनितास्तद्भेदांश्च निरूप्य अन्यदपि निरूपयति॥ एताश्च पूर्वोक्ता अन्यसंभोगदुःखिताः वक्रोक्तिगर्वि
ताः मानवत्यो मानयुक्ताश्चेति त्रयः॥ अन्यसंभोगदुःखिता यथा॥ त्वं दूतीति॥ मत्खेदखिन्नो दुःख उपतापे इति धातोः॥ दूतयति
गुत्पत्यात्वं कुंजं निर[illegible]गाः मत्प्रियविरहदुःखलुन्पतया दुःखितमात्मानं सुखयितुं कुंजप्रदेशं गतवतीत्यर्थः॥ तु पुनः पापीय
सोविप्रियकारिणो गृहं न॥ तदानयनं तु मत्सुखार्थं स चान्यया सक्त इति किं तद्गृहगमनेनेति भावः॥ किमिदं वसतिचेत्तत्राह॥ दती४

एता अन्यसंभोगदुःखिता वक्रोक्तिगर्विता मानवत्यश्चेति तिस्रो भेदाः भवंति॥ ॥अन्यसंभोगदुःखिता यथा॥ ॥
त्वं दूतीति निरगाः कुंजं न तु पापीयसो गृहं॥ किंशुकाभरणं देहे दृश्यते कथमन्यथा॥२३॥ ॥वक्रोक्तिगर्विता द्विधा॥
प्रेमगर्विता सौंदर्यगर्विता च॥ ॥२७॥

अन्यथा मे वंचे देहे अंगे किंशुकाभरणं कथं दृश्यते॥ सर्वं मत्प्रियं त्वया संपादितमिति सोपहासं प्रियभुक्त इतीनखक्षतादिद ति१
र्शनेन नायिकायाः दुःखागमप्रतीतिर्ध्वन्यते॥ किंशुकचिन्हेन कुंजगमनानुमानं इत्समां तु नालंकारः॥ अनुमानं तु का
र्यादेः कारणाद्यवधारणमिति स तु वक्रोक्त्या व्याजस्तुत्या च नखक्षतेषु किंशुकापन्हनव्याजस्तुतिमुखेन निंदास्तु
तिर्वा रूढिरन्यथेति॥२३॥ वक्रोक्तिगर्विताद्वैविध्यं दर्शयति॥ प्रेमगर्विता सौंदर्यगर्विता च॥ ॥२७॥ ॥२७॥ ॥२७॥

अनुष्टुप्छंदः॥१

प्रेमगर्विताया उदाहरणमाह ॥ वपुषीति ॥ काचिदात्मानमधिकमन्यमानासखीं वदति ॥ हे सखि अत्र तवेति पदमुभयत्र योज्यं ॥ का काक्षिन्यायेन ॥ तव प्रभुः स्वामी तव वपुषि रत्नभूषां तनोति ॥ इति हेतोः धन्यतमासि ॥ स्वाधीनभर्तृकत्वादतिशयेन धन्यासीत्यर्थः ॥ किं ब्रवीमि नहीं वक्तुं शक्यते इत्यर्थः ॥ तथाहमित्याह ॥ मे कांतः विभूषणानि न कलयति न धारयति ॥ किंभूतः तनुनयनांतरालभीरुः ॥ तनु मे मनयनं तदीयं तयोरंतरालं व्यवधायकं तेन भीरुः ॥ भूषायां मदंगां तरीयं जातमिति इत्यर्थः ॥ धन्यतमेति स्वाधिक्यकथ

प्रेमगर्विता यथा ॥ ॥ वपुषि तव तनोति रत्नभूषां प्रभुरिति धन्यतमासि किं ब्रवीमि ॥ सखि तनुनयनांतरालभीरुः कल
यति मे न विभूषणानि कांतः ॥ ३४ ॥ ॥ सौंदर्यगर्विता यथा ॥ ॥ कलयति कमलोपमानमक्ष्णोः प्रथयति वाचि सुधार
सस्य साम्यं ॥ सखि कथय किमाचरामि कांते समजनि तत्र सहिष्णुतैव दोषः ॥ ३५ ॥ ॥ मानवती यथा ॥ ॥ प्रियापराध
स्त्रचिका चेष्टा मानः ॥ स च लघुर्मध्यमो गुरुश्च ॥ अल्पापनेयो लघुः ॥ कृष्टतरापनेयो मध्यमः ॥ कष्टतमापनेयो
गुरुः ॥ असाध्यस्तु रसाभासः ॥ अपरस्त्रीदर्शनादिजन्यो लघुः ॥ गोत्रस्खलनादिजन्यो मध्यमः ॥ अपरस्त्री
संगजन्यो गुरुः ॥ अन्यथासिद्धकुतूहलापनेयो लघुः ॥ अन्यथावादशपथापनेयो मध्यमः ॥ चरणपातभूषणाद्यपनेयो गुरुः ॥
नायव्यतिरेकालंकारः ॥ उक्तंच ॥ उपमाधन्यस्य व्यतिरेकः स एव कइति ॥ ३४ ॥ सौंदर्यगर्विताया उदाहरणमाह ॥ कल
यतीति ॥ ॥ ३५ ॥ मानवतीं यथेति तां उदाहरति ॥ प्रियापराधं सूचयतीति तथा सूचकाचेष्टा मानः ॥ स च लघु
र्मध्यमो गुरुश्चेत्याद्युदाहरणापर्यंतं स्पष्टं ॥ उक्तं च रूपटे सप्रयोभवेद् ॥ त्रेधा कामिनीनां प्रियं प्रति अपेक्ष्य तेषम
२ काचित्सखीं वदति ॥ हे सखि कांते श्रेयसि किमाचरामि किं करोमि तत् कथय उपदिशेत्यर्थः ॥ तत्र तस्मिन्कांते सहिष्णुतैव तादृशे कांत्यसहनशीलत्व
मेव दोषः समजनी संजातः ॥ किंभूते कांते मे अक्ष्णोः कमलोपमानं कमलतुल्यं कलयति कथयतीत्यर्थः ॥ पुनः मे वाचि सुधारसस्य अमृतस्य
साम्यं समतां प्रथयति प्रख्यापयतीत्यर्थः ॥ पुष्पिताग्रा वृत्तं ॥ ३३ ॥ लस्य गरीयान्मध्यमो लघुः ॥

रसमं॰टी
९५

अपरस्त्रीदर्शनजन्मानमुदाहरति॥स्वेदांबुभिरिति॥काचित्सखी वदति हे शातोदरि शांतं स्वांतं उदरं यस्याः सा तत्संबोधने प्रिये कांते अन्यां अपरां नायिकां विलोकयति सति॥न विलोकनमात्रं किंतु भूषयत्यपि सति तव मानः क्व कस्मिन्प्रदेशे पदं चरणं दास्यति॥तत्पदं स्थानं न विद्मः॥न जानीमः यतः एतत्तु अंगं क्वचन प्रदेशे स्वेदांबुभिर्विच्छिन्नं क्वचन प्रदेशे कंटकितं संजातकंटकं॥उभयत्रापि ईर्ष्योदयेन स्वेदरोमांचयुक्तमिति भावः॥चकास्ति शोभते॥किमिव हिमं धुरायां मंडन

अपरस्त्रीदर्शनादिजन्मायथा॥ ॥स्वेदांबुभिः क्वचन पिच्छलमेतदंगं शातोदरि क्वचन कंटकितं च कास्ति॥अन्यां विलोकयति भूषयति प्रियेऽपि मानः क्व दास्यति पदं तव तन्न विद्मः॥३६॥गोत्रस्खलनादिजन्मायथा॥ ॥यद्गोत्रस्खलनेन यत्र भ्रमो यदि न मन्यसे॥रोमालिव्यालसंस्पर्शं शपथं न

राम
९५

नाहतीनामितिभावः॥स्वेदांबुभिः क्वचन पिच्छलमंगमभून्माविति पाठो असमंजसत्वात्॥वसंततिलकछंदः॥३६॥
गोत्रस्खलनजन्मायथोदाहरति॥यद्गोत्रेति॥हे तन्वि यद्गोत्रस्खलनं सपत्नीनामेवोच्चारणमित्यर्थः॥ तत्रोच्चारणे भ्रमो यदि न मन्यते त्वयेति भावः॥तर्हि रोमालिः रोमश्रेणिः सैव व्यालः सर्पस्तस्य संस्पर्शेन तत्प्रकारक शपथं कारय तद्दोषपरिहाराय शपथं कुर्वे मां प्रेरयेत्यर्थः॥अनुष्टुप्छंदः॥३७॥ ॥८॥ ॥८॥ ॥८॥ ॥८॥ ॥

अपरस्त्रीसंगमादिजन्मा यथा तथोदाहरति ॥ दयितेति ॥ सुदृशो नायिकाया नयनस्य प्रेक्ष्यसंबंधादेकत्वं ॥ कोणभासा प्रांत
कांत्या स्फुरितमुक्ताः कृष्णीकृतसीकृतमुक्ताफलानि शिखरोपमाः दाडिमीबीजतुल्या बभ्रुवुर्जाताः ॥ सापराधे प्रेयसि क्रोधे ने
त्रिभावः ॥ किं कृत्वा सपत्न्याः चरणालक्तकेनापि पिंजरं पीतरक्तवर्णं दयितस्य भालदेशं निरीक्ष्य तिर्यग्गवलोक्येत्यर्थः ॥ अपक्षं
दर्शितच्छंदः ॥ तल्लक्षणं ॥ षड्विषमेष्वेत्यमेकालाला श्वससर्वेषु नौ निरंतराः ॥ न समात्र पराश्रीता कलावेतालीयें तरलौ गुरुः ॥
मंत्रैवीतेधिके गुरोयम्पादो पक्षं छंदसि कुकवीदृढ घंतत्रैववैतालीये ज्ञतिपादं तेऽधिके गुरौ सतीत्यर्थः ॥ ८८ ॥ त्रासं
गिकतया तासां दशांतराणि रूपयति ॥ एताः षोडशेति ॥ त्रयोदशविधा स्वीया यथा ॥ मध्याप्रगल्भयोः प्रत्येकं धी

अपरस्त्रीसंगजन्मा यथा ॥ ॥ दयितस्य निरीक्ष्य भालदेशं चरणालक्तकपिंजरं सपत्न्याः ॥ सुदृशो नयनस्य
कोणभासः स्फुरितमुक्ताः शिखरोपमाः बभ्रुवुः ॥ ८८ ॥ ॥ एताः षोडशा ऽष्टभिरवस्थाभिः प्रत्येकमष्टविधाः ॥ ॥ प्रोषि
तभर्तृका ॥ खंडिता ॥ कलहांतरिता ॥ विप्रलब्धा ॥ उत्का ॥ वासकसज्जा ॥ स्वाधीनपतिका ॥ अभिसारिका चेति ॥ गणनया

रादिभेदाः षट् ॥ पुनस्तयोर्ज्येष्ठाकनिष्ठात्वेन षट् ॥ एवं द्वादश मुग्धा त्वेकैवेति मिलित्वा त्रयोदश ॥ १३ ॥ परकीया द्विविधा ॥ अष्टा
वस्थाभिः प्रत्येकमेकैकं प्रति अष्टविधाः ॥ अष्टौ प्रकाराः ता अवस्था आह ॥ प्रोषितेति ॥ प्रोषितो देशांतरं गतो भर्त्ता यस्याः सा ॥ १ ॥
खंडिता अन्यासक्तत्वेन पत्यादियुक्तेत्यर्थः ॥ २ ॥ कलहांतरिता कलहेनांतरिता हतेत्यर्थः ॥ ३ ॥ विप्रलब्धा विप्रलंभेन विसं
न वादेन युता विमर्शेत्यर्थः ॥ ४ ॥ उत्का उत्कंठेत्यर्थः ॥ ५ ॥ वासकसज्जा वासक एव वासको वारस्तत्र सज्जयति तल्पादिकं सा ॥ ६ ॥
स्वाधीनपतिका स्वाधीनः पतिर्यस्याः सा ॥ ७ ॥ अभिसारिका स्वयमभिसरति अभिसारयति वा सा ॥ ८ ॥ एवं गणनात्स्पष्टं

तासां नायिकानामपि उत्तमादिगणनात् शतत्रयं चतुरशीत्यधिकयुतं भेदा भवंति॥ तथा च रसार्णवे॥ त्रयोदशविधा स्वीया द्विधा च परांगनाः॥ एका वेश्या पुनश्चाष्टावस्थादिभेदतो मताः॥ पुनश्च ता स्त्रिधा सर्वा उत्तमाधममध्यमाः॥ इत्थं शतत्रयं तासामशीतिश्चतुरोत्तममिति निराकरणाय मूलमनुवदति॥ यदपीति॥ एतासां च नंदरंगिणिना नां दिव्यादिव्योभये साद्यर्जुनादय इत्यं तं स्पष्टं॥ यद्यपी

तासामपि उत्तमाऽधममध्यमगणनया चतुरशीतियुतं शतत्रयं ३८४ भेदाः भवंति॥ यत्तु तासां दिव्याऽदिव्योभयभेदेन गणनया द्विपंचाशदधिकशतयुतं सहस्रं ११५२ भेदा भवंति॥ दिव्या इंद्राण्यादयः॥ अदिव्या मालत्यादयः॥ दिव्याऽदिव्या द्रौपद्यादय इति॥ ॥तन्न॥ ॥अवस्थाभेदेन नायिकानां भेदात् जातिभेदेन भेदस्वीकारे नायिकानामप्येवमानंत्यं स्यात्॥ तथाहि॥ दिव्याऽदिव्यादिभेदा नायकानामपि संति॥ ॥यथा॥ ॥इंद्रादयो दिव्याः॥ अदिव्या माधवादयः॥ दिव्याऽदिव्या अर्जुनादय इति॥ ॥यद्यपि मुग्धाया यथा धीरादिभेदाभावस्तथाविधप्रज्ञासामग्र्यभावात्॥ तथाविधत्वाभावो भवितुमर्हति॥ तथापि प्राचीनलेखनानुरोधेन न वोढाम प्यलब्ध एते भेदाश्च वगंतव्याः॥ ॥ (margin: १९ … राम १६)

॥श्रीकृष्णाय वासुदेवाय हरये परमात्मने प्रणतः क्लेशनाशाय गोविंदाय नमो नमः॥ ॥७॥ ॥७॥ ॥७॥ ॥

ति॥ मुग्धायाः नायिकायाः यथा धीरादिभेदस्याभावः॥ तथाविधधीरादिप्रकाराया प्रज्ञा सामग्रीतस्या अभावात्॥ तथाऽपि विधत्वाभावेऽपि भवितुमर्हति॥ तथापीति॥ प्राचीनानां कवीनां लेखनस्यानुरोधेनाग्रहेण नवोढां लज्जाभयपराधीनरूपां मुग्धां अलं आश्रित्य एते भेदाः प्रोषितभर्तृकादयः अवगंतव्याः ज्ञातव्याः॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥

तत्र प्रोषितभर्तृकां दर्शयति॥ देशान्तरगत इति॥ देशान्तरपदेनोक्तादिदृष्टति व्याप्तिं निराकरोति॥ उक्तेत्यादिस्पष्टं॥ अस्याः प्रोषित
भर्तृकायाश्चेष्टाक्रियादशावस्था॥ अभिलाषचिन्तादयो वक्ष्यमाणा॥ मुग्धां प्रोषितभर्तृकामुदाहरति॥ दुःखमिति॥ अंबुजमु
खी मुग्धा यतः तूयनदिस्यत्ययं॥ यतो हेतोः संतापसहनेन तत्र हेतुं चेतोभवो कामो देवताना तिरहच्छयत्वादिति भावः॥ नान्य इत्यर्थः॥

देशान्तरगते भर्तरि संतापव्याकुला प्रोषितभर्तृका॥ उक्ता कलहान्तरिता विप्रलब्धानोपपतिरेव
न्यन्तरगतो न भवतीति न तत्राति व्याप्तिः॥ ॥अस्याश्चेष्टा दशावस्था॥ ॥मुग्धा प्रोषितभर्तृका यथा॥ ॥दुःखं दीर्घतरं वहत्यपि सखीवर्गाय नो भाषते शैवालैः शयनं सृजत्यपि पुनः शेते न वा लज्जया॥ कण्ठे गद्गदवाचमञ्चति दृशा धत्ते न बाष्पोदकं संतापं सहते यदम्बुजमुखी लब्धे [illegible] चेतोभवः॥३१॥

संतापमेवाह॥ दीर्घतरं अतिशयेन दीर्घं बहु बहुलमित्यर्थः॥ दुःखं वहत्यपि दधत्यपि सखीवर्गाय सखीसमूहा
य लज्जयेति सर्वत्र संबंधः॥ नो भाषते न कथयतीत्यर्थः॥ पुनः शैवालैः जलनीलिभिस्तृणविशेषैः शयनं शय्यां सृज
त्यपि रचयत्यपि न वा शेते न निद्राति॥ पुनः कण्ठे गद्गदवाचं स्खलितां गिरं सबाष्पत्वादिति भावः॥ अंचति गच्छति प्राप्नोती
त्यर्थः॥ दृशोर्नेत्रयोर्बाष्पोदकं न धत्ते न दधति॥ विशेषोक्तिरलंकारः॥ शार्दूलविक्रीडितं छन्दः॥३१॥

न०

मध्यां प्रोषितभर्तृकामुदाहरति॥ वासइति॥ काचित्सखी वदति॥ हे सखि वपुषो वासो वसनं तदेव अतिसूक्ष्ममिति भावः॥
कांचीसैव वाचाला बकुलभाषिणो भृंगास्तैः सुभगे सुरभौ वसंते सति अघसमस्तं वासइत्यादि॥ तेतव अधिको भवति॥ विर
हवेदनयाह्रशत्वादिति भावः॥ किं निदानं किं कारणमिति॥ आलजार चौबकुलभाषिणी निस्तत्रैणाकुत्सितार्थो आतचू॥ अ
त्र वैरिविषयत्वेन सत्यत्वेन वा कुत्सितत्वं॥ अत्र नर्मस्फोटालंकारः॥ नर्मस्फोटस्तु भावानां सूचितोल्परसो नवैरिति॥
पश्चान्निर्तबोस्त्रीकट्याः क्लीबे तु जघनं पुरः॥ वसंते पुष्पसमयः सुरभिरित्यमरः॥ वसंततिलकछंदः॥ ४०॥ प्रौढां प्रोषि
मध्या प्रोषितभर्तृका यथा॥ वासस्तदेव वपुषो वलयं तदेव हस्तस्य सैव जघनस्य च रत्नकांची॥ वाचालभृं
गसुभगे सुरभौ समस्तमघाधिकं भवति ते सखि किं निदानं॥ ४०॥ ॥प्रौढा प्रोषितभर्तृका यथा॥ ॥माला
बालांबुजदलमयी मौक्तिकी हारयष्टिः कांचीयातेप्रभवति हरौ सुभ्रुवः प्रस्थिते वा॥ अन्य द्रुमः किमिह
धमनी वर्त्तते वा न वेति ज्ञातुं बाहोरहह वलयं पाणिमूलं प्रयाति॥ ॥४१॥ ॥४०॥ ॥४०॥ ॥४०॥
तभर्तृकामुदाहरति॥ काचित्सखी प्रौढां प्रियरहितां वीक्ष्य वदति॥ सुभ्रुवो नायिकायाः बालांबुजदलमयी बालानि कोमला
नि अंबुजदलानि प्राचुर्येण यस्यां सा माला॥ तथा च मौक्तिकी मुक्तानिर्मिता हारयष्टिः हारलता हारकांचीदृष्टु ईदृशंति कावितत्र
धडः खं हारिणी हरौ कृष्णे प्रभवति प्रकर्षेण कर्मगुणादिसंपत्या भवतीति प्रभवनूयातेगच्छति प्रस्थानं कृतवती त्यर्थः॥ (
प्रस्थितैव दूरंगमनैव कमलदलमाल्यायाः मुक्ताहारस्य संतापात्॥ कांच्या लंघनात्वा वोप्रस्थानमिति॥ अन्यत्किमपि क्रमः॥
अहहेति खेदे॥ धमनी नाडी वर्त्तते न वा इति ज्ञातुं बाहोर्वलयं पाणिमूलं प्रयाति गच्छति॥ अत्र प्रकर्षमेव प्रागल्भ्यं नाडी (

मर्मरः स्वनिते वस्त्रपर्णानामि त्यमरः॥

परकीयां प्रोषितभर्तृकामुदाहरति॥ श्वश्रूरिति॥ श्वश्रूः पतिमातापश्चरलं ददाति॥ कौतुहलेनेतिभावः॥ तदपि दलं तया भ्रूसंज्ञया भ्रूभंगसूचनेन गृह्यते स्वीक्रियते॥ च पुनः स घस्त्र लक्षणं या मर्मरवो का शुष्कपर्णध्वनिस्तत्रास्य शर्मा त्रेणो वस्तुष्के अस्मिन्स्थले मम विरहतायं मा ज्ञासीदिति शंकये त्यर्थः॥ पाणिना न संस्पृश्यते॥ किंच॥ कुरंगीदृशा मृगीदृशा कुरंगीमृगी द कृपस्यास्तया भीत्या च॥ कीदृशेति भावः॥ यालुभ्रीतृभार्यायाः वाचि विषये स्फुहङ्गणस्य वचसा प्रत्युत्तरं प्रतिवचनं दीयते॥ किं तु ऊतवहो ग्निस्तद्वत् क्रूरः श्वासो न मुच्यते॥ पूर्ववच्छंकयेतिभावः॥ अत्र प्रच्छिन्नकामित्वं प्रगटमेव॥ शार्दूलविक्रीडितं॥ सामान्यां प्रोषितभर्तृकामुदाहरति॥ द्वारदेशे उपविष्टा पुरयोषित् वेश्या इति हेतोः अ

परकीया प्रोषितभर्तृका यथा॥ ॥ श्वश्रूः पञ्चदलं ददाति तदपि भ्रूसंज्ञया गृह्यते स द्यो मर्मरशंकया न च तया संस्पृश्यते पाणिना॥ यातुर्वाचि स्फुहङ्गनस्य वचसा प्रत्युत्तरं दीयते श्वासः किं तु न मुच्यते कृतवहक्रूरः कुरंगीदृशा॥ ४२॥ ॥ सामान्यवनिता प्रोषितभर्तृका यथा॥ ॥ विरहविदितमंतः प्रेम विज्ञाय कांतः पुनरपि वसु तस्मा देस मे दास्यतीति॥ मतिचनिचयमक्ष्यो न्यस्य बाष्पोदबिंदून् विसृजति पुरयोषिद्द्वारदेशोपविष्टा॥ ४३॥ ॥ अन्योपभोगचिन्हितः पतिः प्रातरुत्थाय समायाति यस्याः सा खंडिता॥ ॥ प्रातरित्युपलक्षणं॥ ॥ अस्याश्चेष्टा॥ ॥ अस्फुटालाप चिंतासंतापनिश्वासतूष्णींभावाः

क्ष्यो र्नेत्रयोर्मरिचयानांनिचयं समूहं न्यस्य निक्षिप्य बाष्पोदबिंदून् जलकणान् विसृजति प्रकटयति॥ इति किं॥ कांतः कामी अंतर्मनसि स्वच्छेत्यर्थः॥ विरहे न विदितं ज्ञातं मे मम प्रेम स्नेहं विज्ञाय स्व विषयकं मत्प्रेम ज्ञात्वेत्यर्थः॥ तस्माद्देशाद्देस्य आगत्य पुनरपि पूर्ववत् वसु द्रव्यं दास्यति॥ अत्रापह्नुतिरलंकारः॥ मालिनीछंदः॥ ४३॥ अथ खंडितां लक्षयति॥ अन्योपभोगेति स्पष्टं॥ प्रातरित्सको लस्य एव लक्षणं॥ नु नु नियमम् इत्यर्थः॥ अस्याः खंडितायाश्चेष्टा व्यापार॥ अस्फुटालापेति स्पष्टं॥ ॥ ६७॥ ॥ ६७॥ ॥

रसम॰ टी॰
१८

मुग्धाखंडितामुदाहरति॥ प्राणेशः पतिः न वोढरुद्दशाः न वोढाचासौसुदृक् च तस्याः नायिकायाः नयने नेत्रे पाणिना अपिदधे आच्छादयत्॥ किंभूतायाः सुदृशाः वक्षउरस्थलं कुंकुमलांछितं घटचिन्हितं किमुवितर्के इति इत्थं किमपिचिन्हादिकं प्रष्टुं इच्छंत्याः॥ वास्तवेनान्यनायिकास्तनभोगचिन्हे मुग्धात्वं पृच्छंत्या इत्यर्थः॥ आर्याभेद उपगीतः॥४७॥ मध्याखंडितामुदाहरति॥ वक्षोजेति॥ बालानामभिकाना सुग्धाशब्दो मुग्धात्वपरः॥ किंतु वल्लसंभक्षाविति धातुस्तेन चलिनेसंभृते धीराधीरात्वं त्वमरः॥ तस्यप्रियस्य वक्षोजन्हि वे४

मुग्धाखंडितायथा॥ ॥वक्षः किंमुकुललांछितमितिकिमपिप्रष्टुमिच्छंत्याः॥ नयनं नवोढसुदृशः प्राणेशः पाणिनापिदधे॥४७॥ ॥मध्याखंडितायथा॥ ॥वक्षोजचिन्हितमुरोदयितस्यवीक्ष्यदीर्घं नं निश्वस[illegible]सति जल्पति नैव किंचित्॥ प्रातर्जलेन वदनं परिमार्जयंती बाला विलोचनजलानि तिरोदधाति॥ ॥४८॥

राम
१८

न्हितं अन्यनायिकास्तनचिन्हितं उरो वीक्ष्य दृष्ट्वा दीर्घं अधिकं न निश्वसति॥ निर्घृणं प्रतिकिंविक्रिते नेतिभावः॥ किंचिदपि वक्रं न जल्पति पूर्वस्वभावः॥ किंतु जलेन प्रातः प्रभाते वदनं परिमार्जयंती प्रक्षालंती वि[illegible]लोचनजलानि अश्रूणि तिरोदधाति स्थगयति॥ मृद्विकमतिदर्शनेनायं बाष्पं यत् दृष्टुद्विग्नो भवेदिति चातुर्येणेतिभावः॥ अपन्हुतिरलंकारः॥ वसंततिलकछंदः॥ ॥४८॥ निद्राकषायमुकुलीकृततामनेत्रो नारीनखव्रणविशेषविचित्रितांगः॥ यस्याः कुतोपिमगृहमेतिपतिः प्रभाते सा खंडितेति कथिता

बय

[illegible]

प्रौढां खंडितामुदाहरति॥ कोपि नायकः सखायं प्रति वदति॥ अंगना नायिका प्रातः प्रभाते करतलात् तल्पतलोपेतं पंचमी॥ करतले स्थाप
यित्वा स्वस्येत्यर्थः॥ मंगलं मंगलसूचकं आत्मस्मरणादिति भावः॥ आदर्शं आदर्शीयत्॥ किं वक्त्रं व्यत्ययमेव चिन्हान्यवलोक्य स्वापराधं
विगणयन्तेति दर्शयति स्मेत्यर्थः॥ किंभूता अंगना विपक्षपक्ष्मलदृशः॥ विपक्षा सपत्नी चासौ पक्ष्मलदृक् च तस्याः प्रशस्तानि पक्ष्मा
णि यस्याः सा पक्ष्मला तथा दृक् यस्याः सिध्यादिभ्यश्चेति लच्॥ तस्याः पादांबुजालक्तकैः आलिंगितं आननं मुखं यस्य तं मां ज्ञानकारणा
दिति भावः॥ उद्वीक्ष्य उच्चैर्दृष्ट्वा अनतीकृतमुखी न प्र[illegible] आननं [illegible] आनतीकृतं नम्रीकृतं मुखं यया सा विप्रियकारिणो दर्शनमेव

प्रौढा खंडिता यथा॥ ॥मामुद्वीक्ष्य विपक्षपक्ष्मलदृशः पादांबुजालक्तकैराश्लिष्टाननमानतीकृतमुखी चित्रार्पितेवा
भवत्॥ व्याकुं नोच्छ्वसती न वाक्ततवती निःश्वासकोष्णोदृशो प्रातर्मंगलमंगनाकरतलादादर्शमादर्शयत्॥४१॥
परकीया खंडिता यथा॥ ॥कांतं निरीक्ष्य वलयांकितकंठदेशं मुक्तास्तया परभिया परुषा न वाचः॥ इह्वतीमुखे
मृगदृशा स्खलदंबुपूरादूरात्परं निदधिरे नयनांतपाताः॥ ॥५॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥

किंच रुक्षं नीरसं न उक्तवती॥ अथ
रमिति धियेति भावः॥ चित्रार्पितेव चित्रलिखितेव अभवत्॥ यातेत्यर्थः॥ विषादविमूलनयेति भावः॥ शार्दूलविक्रीडितं॥
वाद्दृशो निःश्वासेन कोपेन बाष्पैः किंचिद् उष्णं न कृतवती अत्रापि रुक्षवक्त्रव्यापभावे पूर्वश्लोकोक्त एव भावः॥ प
॥४१॥ परकीयां खंडितामुदाहरति॥ मृगदृशा नायिकया अंकितकंठदेशं कांतं कामिनं निरीक्ष्य परभिया प्रच्छन्नकामिन्या तद् इति भावः॥
परुषाः कठोरवाचो नोक्ताः॥ किंतु तया इह्वतीमुखे स्खलदंबुपूरात् स्खलन् अश्रुपूरो अश्रुप्रवाहो यस्मिन् तेन नयनांतपाताः दूरात् निर
धिरे निक्षिप्ताः॥ स्फुटं यस्य प्रभवेचित्र्यमवलोकयेति धियेति भावः॥ वसंततिलकछंदः॥ ॥५॥ ॥७॥ ॥७॥

रसमं॰टी॰
११

सामान्यवनितां खंडितामुदाहरति॥ वारस्त्रिया ... वेश्याइत्युक्ता प्रचलचेतसः प्रियतमस्य करतलात् कृपात् शब्दायमानं कनककंक (याः)
णं समाकृष्यते बलात् गृह्यत इत्यर्थः॥ वारस्त्रीगणिका वेश्या रूपाजीवाथ सा जनैरित्यमरः॥ इतीति किं॥ तव इदं उरः पयोधरांकितं अन्य
नायिकायाः स्तनचिन्हितं॥ अतः मे कुतः क्षमा॥ ततो हे नोऽस्यतुरो पूर्वं अंगीकृतं वसु द्रव्यं त्वं मयि विषये निधीयतां दीयतां॥ पृथिवी छंदः॥
॥५१॥ कलहांतरितामुदाहरति॥ अस्याः कलहांतरितायाश्चेष्टा भ्रांतिर्मिथ्याभ्रम इत्यमरः॥ मोहो इंद्रियवैकल्यं स्पष्टमन्यत्॥ मुग्धां
कलहांतरितामुदाहरति॥ नवोढा मुग्धा लज्जमाना पतिं लज्जमानमिति योज्यं॥ कलहेनावमानितमित्यर्थः॥ नानुनयति॥ सखीजना

सामान्यवनिता खंडिता यथा॥ ॥उरस्तव पयोधरांकितमिदं कुतो मे क्षमा ततो मयि निधीयतां वसु पुरा यदंगीकृतं॥ इति
प्रचलचेतसः प्रियतमस्य वारस्त्रिया कणत्कनककंकणं करतलात् समाकृष्यते॥५१॥ ॥पतिमवमत्य पश्चात्परित-
स्या कलहांतरिता॥ ॥अस्याश्चेष्टा॥ ॥भ्रांतिसंतापसंमोहनिश्वासज्वरप्रलापादयः॥ ॥मुग्धा कलहांतरिता यथा॥ ॥
अनुनयति पतिं न लज्जमाना कथयति नापि सखीजनाय किंचित्॥ प्रसरति मलयानिले नवोढा वहति परं तु चिराय शून्यमं-
तः॥५२॥ ॥मध्या कलहांतरिता॥ ॥विरमति कथं विना न खेदः सति कथने समुपैति कापि लज्जा॥ इति कलहमु सखी सखीमवोच

यापि किंचित्कर्तव्यादिना कथयति॥ परंतु मलयानिले प्रसरति॥ चिराय चिरकालं शून्यं ज्ञानरहितं अंतः अंतःकरणं वहति॥ विरह
दाहकत्वात् दक्षिणवायोर्धर्षणत्वेति भावः॥ पुष्पिताग्रा छंदः॥५२॥ मध्यां कलहांतरितामुदाहरति॥ इति शब्दश्चिंतये इति भावः॥ अ
धोमुखी अधोनीचैर्मुखं यस्याः सा नायिका कलहं पत्या सहेति शेषः॥ सखीभ्यः लपितुमानालपितुं समाचकांक्ष॥ धाष्ट्र्याभ्यां
कथयितुं नैच्छदित्यर्थः॥ इतीति किं॥ चेतः कथनं विना न विरमति न शाम्यतीत्यर्थः॥ निवेदयतु दुःखं सुखिनो भवंतीति पुनः कथ
ने सति कापि लज्जा समुपैति॥ अधाष्ट्र्यादुक्तुं न शक्यत इत्यर्थः॥ संशयालंकारः॥ ॥पुष्पिताग्रा छंदः॥५३॥ ॥५४॥ ॥
मध्यो॰

राम
११

पा२

प्रौढां कलहांतरितामुदाहरति॥ कापि सखीं नायिकां प्रति वदति॥ अयेअज्ञे क्रीडारसानभिज्ञे॥ यद्वा क्रुधारसज्ञे इस्येकं पदं कोपरसज्ञे इत्यर्थः॥ यद्वा रसज्ञेन चयके क्रुधा क्रोपेनेति सर्वत्र योज्यं॥ नेत्रशोणिमानं नेत्रयो रारक्तत्वं किमु अकरोः कषाद्भतवती त्यर्थः॥ गमुनांक र पद्येन नजं नं बहिर्निःकासनरूपं किं अकार्षीः किं कृतवती॥ अतिकोमलेन कठिणाचरमिति कोपवैचित्र्यमुक्तं॥ किंच कलहं किंअ धाः कृतवती॥ यद्वा नायिकान्ते त्र करपयसरे ज्ञें द्रियाण्यामें स्यवदहि॥ रसज्ञा जिव्हा शेषं पूर्ववत्॥ उत्क्रमेन तन्हितमिति॥ दैवेनद ष्टाः हताः हितं अर्थं नविंदंति॥ नजानंति॥ घुपच्छंदसिकं छंदः॥५४॥ परकीयां कलहांतरितां दर्शयति॥ सखी वदति॥ हतधियामया

प्रौढा कलहांतरिता यथा॥ ॥अकरोः किमु नेत्रशोणिमानं किमकार्षीः करपद्मवा निरोधं॥ कलहं किमधाः क्रुधारस ज्ञे हितमर्थं नविंदंति दैवदष्टाः॥५४॥ ॥परकीया कलहांतरिता यथा॥ ॥भर्तुर्यस्य कृते गुरुर्लघुरभूत्‌ गोष्ठीकनिष्ठी कृता धैर्यं कोशधनं गतं सहचरीनीतिः कृता दूरतः॥ निर्मुक्ता लपावत्रपापरिचिता स्रोतस्वती बिंदुवत्‌ स क्रोधाद वधा रितो हतधियामालवलीयान्विधिः॥५५॥

क्रोधात्स अवधीरितः धिःकृतः॥ भो माताः विधिर्दैवो बलीयान्‌॥ तस्यैवेदं दुर्व्यवसितं॥ न मे अपराध इत्यर्थः॥ स कः यस्य भर्तुः श्रृंगा रादिरसपोषकस्येत्यव्ययं॥ यन्निमित्तमित्यर्थः॥ गुरुः श्वसुरादिः लघुरभूत्‌॥ मम अगणनीयो जात इत्यर्थः॥ पुनः गोष्ठी जनस्य स्नेहः कनिष्ठी कृतः॥ अदृश्याभूदित्यर्थः॥ पुनः धैर्यं धीरत्वं विवेकित्वमित्यर्थः॥ तदेव कोशधनं भांडागारगतद्रव्यं गतं किम पिनावशिष्टमित्यर्थः॥ पुनः सहचरी समीपवर्तिनी सखी तस्याः नीतिः दूरतः [illegible] स्यात्‌ नीतिगंभीरनीरा नदीत्यर्थः॥ बिंदुवत्परि चितासंकेतवर्त्म त्यागच्छं त्यामयाबिंदुनातुल्यमभ्यस्तेत्यर्थः॥ अत्र नमेस्फोटालंकारः॥ समत्यापरिबत्रे ष्ठीस्रोतस्वतीद्वीपव

कृता त्रपात्मपावत्‌ निर्मुक्ता स्रोतो २

रसमं॰टि॰
२०

सामान्यां कलहांतरितामुदाहरति। हे सखियो नायकः तत् सर्वं यथार्थं स स्वार्थं अकरोत् तस्मिन् तादृशे प्रकोपः कृतः मा धिक् ॥ अहं निंद्येत्यर्थः ॥ मम जीवनं प्राणधारणं धिक् ॥ ये नैवं अतनुत्वे तस्यमुक्तमिति भावः ॥ चेष्टितं कर्यादि धिक् ॥ यतः ममेति सर्व संबंधः ॥ पाणिकमलं पंके रुहस्य कमलस्य लक्ष्म चिन्हं यस्मिन् तत् तू यद्भाग्यालये जन्मकुलिकायां गुरुबृहस्पतिः

१४।२

वा

सामान्यवनिता कलहांतरिता यथा ॥ ॥ यत्पंकेरुहलक्ष्मपाणिकमलं भाग्यालये यद्गुरुर्न्यस्तो मम यल्ललाटफलके भाग्याक्षरं वेधसा । तत्सर्वं सखियो यथार्थमकरोत्तस्मिन्प्रकोपः कृतो धिङ्मां धिङ्मम जीवितं धिगतनुं धिक् चेष्टितं धिग्वयः ॥ ५६ ॥ ॥ संकेतनिकेतने प्रियतममनवलोक्य समाकुलहृदया विप्रलब्धा ॥ ॥ अस्याश्चेष्टा ॥ ॥ निर्वेदनिश्वाससखीजनोपालंभचिंताश्रुपातादयः ॥ ॥५७॥ ॥५७॥ ॥

राम
२०

वा पुनः वेधसा ब्रह्मणा ललाटफलके यद्भाग्याक्षरं न्यस्तं लिखितं सर्वं सौभाग्यसूचकत्वात् उद्व्यगलं ध्वनितं ॥ शाईत विक्रीडितं वृत्तं ॥ ५६ ॥ ॥ विप्रलब्धां दर्शयति ॥ संकेतनिकेतने त्यादि स्पष्टं ॥ अस्याः विप्रलब्धायाश्चेष्टा निर्वेदादयः ॥ तत्र निर्वेदः स्वावमानं सखीजने उपालंभः ॥ चिंता तदपराधस्मृतिः ॥ मूर्च्छा इंद्रियवैकल्यं शेषं स्पष्टं ॥ ५७ ॥ ॥

ना४

मुग्धांविप्रलब्धामुदाहरति॥आलीभिःसखीभिःअनेककपटैःअनेककपटव्याजयुतैःशपथैःकुंजोदरंसंकेतीकृतंकुंजमध्यं
नीतयाविप्रलब्धयानायिकयातत्रकुंजोदरंशून्यंप्रियरहितंनिरीक्ष्यविस्तुमितयानप्रस्थितंनचलितंनस्थितंप्रिय गमनागम
नाभ्यांव्याकुलितमित्यर्थः॥किंतुनवोढानीरजदृशानवोढाचासौनीरजदृक्चतया॥तथाकुंजोपकंठेकुंजसमीपेदृष्टयोन्य
स्ताःपरितःक्षिप्ताइत्यर्थः॥रुषाकोपेनविगतमनोरथेनभ्राम्यंतोव्याकुलायेभृंगास्तेषांकदंबसमूहस्तस्यडंबरोभ्रमणरूपारभटीत
स्यचमत्काराश्रि त्रविलासास्तान्स्पृशंतीतितत्तुल्याइत्यर्थः॥निदर्शनालंकारः॥शार्दूलविक्रीडितंवृत्तं॥८७॥मध्यांविप्रलब्धांदर्श

मुग्धाविप्रलब्धायथा॥ ॥आलीभिःशपथैरनेककपटैःकुंजोदरंनीतयाशून्यंतत्रनिरीक्ष्यविस्तुमितयानप्रस्थितं
नस्थितं॥यस्याःकिंतुनवोढनीरजदृशाकुंजोपकंठेरुषाभ्राम्यद्भृंगकदंबडंबरचमत्कारस्पृशोदृशः॥८७॥

मध्याविप्रलब्धायथा॥ ॥संकेतकेलिगृहमेत्यनिरीक्ष्यशून्यमेणीदृशोनिभृतनिःश्वसिताधरायाः॥अ
र्द्धाक्षरंवचनमर्द्धविकाशिनेत्रंतांबूलमर्द्धकवलीकृतमेवतस्थौ॥८८॥

यति॥एणीदृशोमृगनेत्र्याःवचनंअर्द्धाक्षरमेवअर्द्धानिअक्षराणियस्मिन् तल्ग्ना नेत्रंअर्द्धविकाश्येवअर्द्धविकासोयस्य
तनू॥तांबूलंअर्द्धकवलीकृतमेव॥नस्फुरतिसर्वत्रक्रियासंबंधः॥नदर्शनेनवैकल्यात्जडीभूतेवस्थितवतीत्यर्थः॥किं
भूतायाःसंकेतकेलिगृहंएत्यप्रियसंगमेच्छयाप्राप्यतच्चशून्यंकांतरहितंनिरीक्ष्यनिभृतनिःश्वसिताधरायाःनि
भृतंमंदंनिःश्वसितंयस्मिन्तथाभूतोअधरोयस्यास्तस्याःअत्रअर्द्धविकाशिनेत्रमितिनार्द्धमुकुलादृष्टिःतस्याआ
नंदविधाना॥अतःशून्यादृष्टिरियंयथासमतीतापुष्टादरस्यदृष्टशून्यविलोकनिःकंपाधराशून्याचिंतायदृष्टिरिष्टा

न

प्रौढां विप्रलब्धामुदाहरति॥ तथाभ्रन्यं कांतरहितं कुंजगृहं निरीक्ष्य चेतोभवं कामं क्रूरं कुटिलं प्रियाविरहपीडाजनकत्वात् ॥ इत्यपि
न निवेदिता॥ कांतनयनार्थं ज्ञापितेत्यर्थः॥ परंतु पंकजदृशा तया इति एवं भर्गस्य भर्जनेअग्निनास्मर इति भर्गस्य स्मरस्येत्यर्थः॥
स्कृतिं चक्रे क्रियते स्म इति क्रिं॥ शंभो शंकर शंके ल्या णं भवत्यस्मादिति॥ शं करोतीति पदद्वयं संतप्तानां सुखकारित्वेन॥ चंद्र
शेखर चंद्रस्तव शेखरे तिष्ठतीति काममित्रत्वाज्ज्वालाभिर्वेह्वो विरहिणीदुःखजनको माभवत्विति॥ नयनोत्पलमपि भयमिति भावः॥

प्रौढाविप्रलब्धा यथा॥ भ्रन्यं केलिगृहं विलोक्य कुटिलं विज्ञाय चेतोभवं दूतीनाऽपि निवेदिता सह
चरीपृष्टापि नो वा तया॥ शंभो शंकर चंद्रशेखर हर श्रीकंठ भ्र ... लि नूः शिव त्रायस्वेति परं तु
नीरजदृशा भर्गस्य चक्रे स्तुतिः॥५९॥ ॥८७॥ ॥८७॥ ॥८७॥ ॥८७॥ ॥८७॥ ॥

हरति सर्वेषां दुःखमिति हरः॥ श्री कंठः श्रीः शोभा कंठे यस्य विषभक्षणात्॥ गौरांगस्य नीलकंठत्वं शोभैव॥ अतो मद्दुःखविषहरणं क्रिय
दिति भावः॥ शूलिन् त्रिपिति त्रिशूलेन निःशेषं हंतव्यः॥ स्मरत्वात्तस्य ततः पूर्ववदाहः संयुजत इति॥ न विश्वासनीय इति भावः॥ शिवेति आ
नंदरूपोसि त्वं॥ यद्वा शिवा गौरी विग्रहे अर्द्धांगत्वेन यस्य सः॥ अर्शआदित्वादच् प्रत्ययः॥ तथा प्रियमिलनायानंदरूपं कुरुष्वेति भा
वः॥ शार्दूलविक्रीडितं वृत्तं॥ ॥५९॥ ॥ हरे राम हरे राम राम राम हरे हरे॥ ॥ हरे हरे लक्ष्मण हरे लक्ष्मण लक्ष्मण लक्ष्मण हरे हरे॥ ॥

परकीयां विप्रलब्धामुदाहरति। दत्वेति॥ तन्व्या तन्व्यंग्या प्रियो न दृष्टः संकेत इति भावः॥ किं कृत्वा धैर्यमेव भुजंगः सर्पस्तस्य मूर्ध्नि स्वच
रणौ दत्वा॥ यद्वा धैर्यं च भुजंगश्च तयोर्मूर्ध्नि पुनर्लज्जारूपां नदीमुल्लंघ्य॥ पुनः घनांधकारस्य पटलं घनं निबिडं अंधःकारं तस्य
पटलं समूहं अंगीकृत्य गतये नि शेषः॥ च पुनः संतापेन आकुलतया पाथोधरे जलधरे गर्जति सति क्रोधेन आक्रांतो व्या
घ्रोयः कृतांतः समत्तमहिषस्य भ्रांत्या कालमहिषोयमिति भ्रमेण परितः सर्वतो दृशौ योजिते प्रेरिते मेघस्य विरहवैरित्वात्॥ तदवलो

परकीया विप्रलब्धा यथा॥ ॥दत्वा धैर्यभुजंगमूर्ध्नि पदं प्रोल्लंघ्य लज्जानदीमंगीकृत्य घनांधका
रपटलं तन्व्या न दृष्टः प्रियः॥ संतापाकुलया तया परितः पाथोधरे गर्जति क्रोधाक्रांतकृतांतमत्तम
हिषभ्रांत्या दृशौ योजिते॥६०॥ ॥सामान्यवनिता विप्रलब्धा यथा॥ ॥कपटवचनभाजा केन
चिद्वारयोषा सकलरसिकगोष्ठीवंचिका वंचितासौ॥ इति विहसति रिंगद्भृंगविक्षिप्तचक्षुर्वि
कचकुसुमकांतिच्छद्मना केलिकुंजः॥६१॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥

च

कनेनैवं भज्यत इति भावः॥ अत्र भ्रांतिमानलंकारः॥ शार्दूलविक्रीडितं वृत्तं॥ ६०॥ सामान्यवनितां विप्रलब्धामुदाहरति॥
कपटेति॥ सकलरसिकगोष्ठीनां वंचिका असौ वारयोषा वेश्या केनचित् कपटवचनवक्रा कपटवचनानि वक्तीति स तेन॥
भावं वंचिता॥ कृत्रिमालंकारदाने ति॥ इति हेतोः रिंगंतो ये भृंगास्त एव विक्षिप्तं चक्षुः यैः येन स केलिकुंजः॥ विकचानि कुसुमा
नि तेषां कांतिच्छद्मना विहसतीति शेषः॥ उत्प्रेक्षालंकारः॥ मालिनी छंदः॥ ॥६१॥ ॥७॥ ॥७॥ ॥७॥

अथोत्कां दर्शयति॥ संकेतस्थलमिति॥ उत्का उत्कंठिता॥ स्पष्टमन्यत्॥ अवधीति॥ अवधिदिवसे अनागते प्रेयसि सती त्यर्थः॥ प्रोषितपतिकायामतिव्याप्तिः॥ निषेधे हेतुमाह॥ तस्या इति प्रोषितपतिकायाः भर्तुः अवधिदिवसे अमुष्मिन् दिने अहमायास्यामीत्यवधिकृतदिने भवनागमनं नियतमिति॥ संकेतपदेतद्व्यावर्त्तनात्॥ भवनेगमननियमस्य व्यावर्तनात्॥ अस्याः उत्कायाः अरतिविषये द्वेषः॥ अंगाकृष्टिः अंगमोटनं कपटं लज्जादिना क्रियाविषयकव्याजः स्पष्टमन्यत्॥ मुग्धोत्कामुदाहरति॥ यन्ना

संकेतस्थलं प्रतिभर्तुरनागमनकारणं या चिंतयति सा उत्का॥ ॥अवधिदिवसानागतप्रोषितपतिकायां नातिव्याप्तिः॥ तस्या भर्तुरवधिदिनसे भवनागमनमितिसंकेतपदेन तद्व्यावर्त्तनात्॥ ॥अस्याश्चेष्टा॥ ॥ अरतिसंतापजृंभा अंगाकृष्टिकंपरुदितस्वासावस्थाकथनादयः॥ ॥मुग्धा उत्का यथा॥ ॥यन्नाद्यापि समागतः पतिरपि प्रायः प्रपेदे परामिच्छं चेतसि चिंतयत्यपि सखीं न व्रीडया पृच्छति॥ दीर्घं निश्वसितं दधाति चकितं न प्रेक्षते केवलं किंचित्पक्वपलांडुपांडुरुचिं धत्ते कपोलस्थली॥ ॥६२॥

द्या पीति॥ प्रियोऽद्यापि न समागत इति यावत्॥ अतः प्रायेण बाहुल्येन परां अन्यां स्त्रियं प्रपेदे प्राप्तवान्॥ इत्थं चेतसि चिंतयत्यपि व्रीडया लज्जया सखीं न पृच्छति॥ किं च दीर्घं श्वसितं न दधाति॥ चकितं सकंपेन प्रेक्षते॥ उभयत्र सखीभीते त्यर्थः॥ केवलं किंचित्मनाक् पक्वो यः पलांडुः कंदविशेषः तद्वत् पांडुरा रुचिः कांतिर्यस्यास्तां कपोलस्थलीं धत्ते॥ विरहसंतापेन बिभर्तीत्यर्थः॥ शार्दूलविक्रीडितं॥ ६२॥

रच्या

मध्याउत्कांउदाहरति॥ आनेतुमिति॥ कापिनवोढानीरजमुखीनीरजं कमलं तद्वन्मुखंयस्याःसा॥ यथाश्रुतव्यो नेमध्यायां नवोढायामुपपत्तिः॥ इत्थं चिंतयतीतिशेषः॥ अक्ष्णोर्विषयेकर्णीयत्स्कवर्णकेतकं तस्यरजसापरागेणायऽपघातःपीडा तस्यच्छलात्बाष्पोदकंमुंचति॥ इत्थंकथंप्रियसखीमत्प्रेषिते त्यर्थः॥ आने तुंनगतात्किंअथवाभुजंगाद्भीतांकिमुमार्गवर्त्तिनः सर्पाद्भीतः किंनागतइत्यर्थः॥ असौप्रियःप्रतिषेधवाचिप्रतिषेधावाक्यस्यास्तस्यांनिषेधंउक्तवत्यांमयीत्यर्थः॥ क्रुद्धोवा

मध्याउत्कायथा॥ ॥आनेतुंनगताकिमुप्रियसखीभीताभुजंगात्किमुरुष्टोवाप्रतिषेधिवाचिकिमसौ प्राणेश्वरोवर्त्तते॥ इत्थंकर्णसुवर्णकेतकरजःपातोपघातच्छलादक्ष्णोःकापिनवोढनीरजमुखी बाष्पोदकंमुंचति॥ ६३॥ ॥प्रौढाउत्कायथा॥ ॥भ्रातर्निकुंजसखिस्थिररसालबंधोमातस्तमः स्विनिपितस्तिमिरप्रसीद॥ पृच्छामिकिंचिदितिनीरधराभिरामोदामोदरःकथयकिंनसमाजगाम॥ ६४॥

वर्त्तते॥ अन्यथाआगमिष्यदित्यर्थः॥ शार्दूलविक्रीडितंवृत्तं॥ ६४॥ प्रौढोत्कामुदाहरति॥ भ्रातर्निकुंजेति॥ भोनिकुंजभ्रातः हेसखिहेरसालआम्रबंधोभोतमस्विनि रात्रेमातः॥ हेमित्रिरपितःप्रसीदेतिप्रत्येकंसंबंधः॥ अस्मिन्वनेभवंतएव[illegible]तरादयइत्यर्थः॥ इतिहेतोःकिंचित्पृच्छामिकथय॥ सजलदकांतिःदामोदरः इदम्सःकिंनसमाजगामनागतवा न्॥ अथयंत्विति वाक्यशेषः॥ दामोदरपदमितिभक्ताधीनत्वंसूचयति॥ तेनकदाचिद्भ्यावशीकृतस्तिष्ठतीतिभावः॥ वसंततिलकवृत्तं॥ ६४॥

रसमं॰टी
२३

मु
परकीयात्कामुदाहरति॥स्नातमिति॥काचित्सखींवदति॥हेसखिकिंतपोनतप्तं॥तथापिअद्यापिइयत्ताकालेनसनायकोने
त्रातिथिर्नेत्रगोचरइत्यर्थः॥कथंनलक्ष्यये इत्यर्थः॥तदेवदर्शयति॥वारिदवारिभिर्मेघजलैःस्नातं॥घनेकाननेवासोरचि
तःपुनर्मनसिजःकामःदेवःशीतैश्चंदनबिं दुभिःआराधितः॥एतेनजोत्स्नायांरजन्यांकोपिमामप्रोक्षि ष्टाइति चंदनलेपो
ध्वन्यते॥पुनःरजनीजागर पात्रतेननीताप्राप्ता॥पुनःक्रीडालज्जादानेकृते इत्यर्थः॥तस्यागमनप्रतीक्षयेतिभावः॥शार्दू

परकीयोत्कायथा॥ ॥स्नातंवारिदवारिभिर्विरचितोवासोघनेकाननेशीतैश्चंदनबिंदुभिर्मनसिजोदेवः
समाराधित ॥नीताजागरणव्रतेनरजनीक्रीडाकृतादक्षिणातप्तंकिंनतपस्तथापिसकथंनाद्या
पिनेत्रातिथिः॥६५॥ ॥सामान्यवनितोत्कायथा॥ ॥कथंनकांतःसमुपैतिकुंजमित्थंचिरंचेतसिचिं
तयंती॥अक्षालयच्चित्तःपतदंबुधारांवारांगनाकापिघनाभिलाषात्॥६६॥ ॥आद्यमेप्रियवासकइति
निश्चित्यासुरतसामग्रींसज्जीकरोतिसावासकसज्जा॥वासकोवारः॥अस्यास्याश्चेष्टा॥ ॥मनोरथस
खीपरिहासदूतीप्रश्नसामग्रीसंपादनमार्गविलोकनादयः॥ ॥६७॥ ॥६७॥ ॥६७॥ ॥६७॥

लविक्रीडितंछंदः॥६५॥सामान्यवनितोत्कांदर्शयति॥कथमिति॥कापिवारांगनावेश्या॥कांतःकथंकुंजंसंकेतस्थलंनस
मुपैति॥इत्थंप्रकारेणचिरंचिरकालंचेतसि चिंतयंति॥अत्रोपजातिछंदः॥इंद्रवज्रोपेंद्रवज्राल्क्षणमिश्रितपादत्वात्॥
॥६६॥अथवासकसज्जांदर्शयति॥आद्यमेप्रियवासकइति॥स्पष्टोवारःस्त्र्यादिवसइत्यर्थः॥अस्याश्चेष्टा॥साकिंक्रियाव
दि

त्यर्थः॥मनोरथश्चासौ॥मनोरथश्चेतसिव ऽ इविधा
कुसुमांसमुदयो॥

46

मुग्धां वासकसज्जामुदाहरति॥ हारमिति॥ नवोढसुमुखी नववधूः मुग्धेत्यर्थः॥ समुत्सुका सती वर्तमानाद्दूराद्वीक्षते पश्यति॥ कांताऽऽगमनमिति भावः॥ किंभूता वासकस्य निश्चितप्रियागमनरूपवासरस्य रजन्यां रात्रौ आलीनां आसमंतात् लीनां निरुद्धां लज्जयेति भावः॥ इति वक्ष्यमाणप्रकारेण कामानुरूपां क्रियां कुर्वतीति शेषः॥ सा चिस्मेरमुखी साचि तिर्यग्भूते त्यर्थः॥ सलज्जयेति भावः॥ स्मेरं सहासं मुखं यस्याः सा॥ इतीति किं॥ तारकांतरुचिरं ताराणां शुद्धमौक्तिकानां या रव्या मानपरूपे युरिति धियेति भावः॥

मुग्धा वासकसज्जा यथा॥ ॥ हारं गुंफति तारकांतिरुचिरं ग्रथ्नाति कांची लतां दीपं न्यस्यति किंतु तत्र वकुलं स्नेहं न धत्ते पुनः॥ आलीनामिति वासकस्य रजनी कामानुरूपां क्रियां साचिस्मेरमुखी नवोढसुमुखी दूरात्समुद्वीक्षते॥ ६७॥

कांतिः शोभा तया रुचिरं रमणीयं हारं मुक्तावलीं रचयति गुंफयति॥ गुंफ संदर्भे॥ पुनः कांचिं [illegible]ति॥ पुनर्दीपं न्यस्यति सज्जयति॥ किंतु तत्र दीपे वकुलं स्नेहं न धत्ते न निक्षिपति॥ तदालोक एव प्रियो रतिकेलिं विधास्यतिल ज्जयेति भावः॥ तारो मुक्तादिशुद्धौ स्याद्भरयोः शुद्धमौक्तिके इति विश्वः॥ हारो मुक्तावलीति विश्वः॥ शार्दूलविक्रीडितं वृत्तं॥ ६७॥ यथा १

॥ हरे राम हरे राम राम राम हरे हरे॥ ॥ हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे॥ ॥ श्री राम जय राम जय जय राम॥ ॥श्री॥

छ

रसमं॰टी॰
२४

मध्यांवासकसज्जामुदाहरति ॥ शिल्पमिति ॥ स्मरः कामदेवः स्मेराननोऽभूत् ॥ किं कृत्वा पश्यदराः कमलनयनायाः इत्थं अनेन प्रकारे
णाचरितं प्रतीत्य ज्ञात्वा ॥ इत्थं कथं ॥ शिल्पं कला कौतुकं शिल्पं दर्शयितुं कुतुकात् कौतुहलात् कल्हारस्रजं हारविशेषाकारेण मा
ल्यां स्वयं करोतीत्यर्थः ॥ चित्रप्रेक्षणकैतवेन चित्रावलोकनैकमिषेणाक्षिमपि तिर्यग्भूतेत्यर्थः ॥ द्वारं समुद्वीक्ष्यते ॥ कांतागमनजि
ज्ञासेतिभावः ॥ पुनः सहचरीभूषाणां सखीभूषाणां जिगीषामिषात् ॥ भवदलंकारापेक्षया ममालंकरणानि रम्याणीति व्याजात्
नवं रत्नं आभरणं गृह्णाति ॥ एवंविधव्यापारं स्मर एव ज्ञातवान् न सख्यः ॥ इति चित्रं ॥ लज्जाकपटाभ्यां सह सकामायास्तस्याः ल

मध्यावासकसज्जा यथा ॥ ॥ शिल्पं दर्शयितुं करोति कुतुकात् कल्हारहारस्रजं चित्रप्रेक्षणकैतवेन किमपि द्वारे समु
द्वीक्षते ॥ गृह्णात्याभरणांतरं सहचरीभूषाजिगीषामिषादित्थं पश्यदराः समीक्ष्य चरितं स्मेराननोऽभूत् स्मरः ॥ ६८ ॥
प्रौढावासकसज्जा यथा ॥ ॥ कृतं वपुषि भूषणं चिकुरधोरणी धूपिता कृता शयनसन्निधौ क्रमुकवीटिकासं
भृतिः ॥ अकारि हरिणीदृशा भवनमेत्य देहत्विषा स्फुरत्कनककेतकीकुसुमकांतिभिर्दुर्दिनं ॥ ॥ ६९ ॥ ॥

शार्दूलविक्रीडितं ॥ ६९ ॥ प्रगल्भांवासकसज्जामुदा
ज्जामदनाभ्यां शिल्पं कर्मकलादिकं ॥ सौगंधिकं तु कल्हारमित्यमरः ॥
हरति ॥ कृतमिति ॥ वपुषि देहे भूषणं पत्रावल्यादि कृतं ॥ पुनः चिकुराणां धोरणी रचनाविशेषः धूपिता अगरुचंदनादिभि
र्धिवासिता ॥ पुनः शयनसन्निधौ शय्यासमीपे क्रमुकवीटिकाश्च नागवल्लीपत्ररचनास्तासां संभृतिः संधारणा कृता ॥
किंच ॥ हरिणीदृशा कांतागमनप्रतीक्षया व्याकुलायेतिभावः ॥ देहस्य त्विषा कांत्या एतस्य संगतस्य स्फुरंती देहकांतिसंबंधे
न शोभातिशायं प्राप्तानि यानि कनककेतकीकुसुमानि तेषां कांतिभिः भवनं गृहं दुर्दिनं अकारि ॥ मेघाच्छन्नेऽह्नि दुर्दिनं ॥ तेनात्र

ये

न

रा॰
२८

मनोरथश्चास्याः यथेति दर्शयति ॥ आवयोरिति ॥ आवयोः मम कांतस्य च अंगयोः द्वैतेद्वयोर्भावो द्विता ॥ स्वार्थे अच् ॥ तस्मिन् द्वैविध्य इत्यर्थः ॥ पुनरपि विरहेन कांतवियोगेन विद्भुषो दुःखं भविष्यतीती शेषः ॥ पुनः अद्वैते च आवयोरंगैकत्वे स्फीतं समृद्धं स्मितं अ न्योन्यवीक्षणं न स्यात् ॥ संदेहालंकारः ॥ ७० ॥ परकीयां वासकसज्जामुदाहरति ॥ स्विश्रूमिति ॥ कापि नायिका छलेन केन चिद्व्या जेन श्वश्रूं स्वापयति निद्रापयति ॥ च पुनः प्रदीपांकुरान् प्ररूढदीपशिखाः तिरोधत्ते ॥ खर्परादिना आछादयतीत्यर्थः ॥ पुनः सौ ।

मनोरथो यथा ॥ ॥ आवयोरंगयोर्द्वैते भूयो विरहविप्लवः ॥ अद्वैते च स्मितं स्फीतं न स्यादन्योन्यवीक्षितं ॥ ७० ॥ ॥

परकीया वासकसज्जा यथा ॥ ॥ श्वश्रूं स्वापयति छलेन च तिरोधत्ते प्रदीपांकुरान् धत्ते सौधकपोतपोतनिन

दैः सांकेतिकं चेष्टितं ॥ शश्वत्पार्श्वविवर्तिनां गलति कात्लोल कपोल द्युति कापि कापि करांबुजं प्रियधिया

तपत्यांतिके न्यस्यति ॥ ॥ ७१ ॥ ॥ ८७ ॥ ॥ ८७ ॥ ॥ ८७ ॥ ॥ ८७ ॥ ॥ ८७ ॥ ॥ ८७ ॥ ॥ ८७ ॥

न २

कपोतानां ये पोताः बालकास्तेषां निनदैः शब्दैः सांकेतिकं चेष्टितं संकेतसंबंधव्यापारं धत्ते करोति ॥ पुनः शश्वत् वारं वारं पार्श्वयोः शय्योभयप्रांते विवर्तिता अंगलतिका यस्यां क्रियायां तद्यथा तल्पांतिके कापि कापि प्रदेशे प्रियधि या जारागमनसंभावनया करं न्यस्यति प्रेरयति ॥ अत्रापन्हुतिरलंकारः ॥ शार्दूलविक्रीडितं वृत्तं ॥ ॥ ७१ ॥ ॥ ८७ ॥

सामान्यवनितां वासकसज्जां दर्शयति॥ चोलमिति॥ वारांगना वेश्या वारेषु रतिदिनेषु यदि स्वयं॥ यत्स्वयं मनोरथं न वितनुते॥ तर्ह्लि
न किमपीत्यर्थः॥ किंभूता॥ इत्थं वक्ष्यमाणप्रकारेण चंदनचर्चितैर्मृगमदैः कस्तूरिभिरंगानि करचरणमस्तकादीनि संस्कुर्वती अ
धिवासयंती॥ इत्थं कथं॥ नीलनिचोलस्य उपरितनप्रच्छादपटस्य कर्षणविधौ चोलं कार्पासिकं याचिष्ये प्रार्थयामि॥ पुनः चुंब
ने चूडामणिं केशपाशरत्नं याचयिष्ये॥ पुनः कुचयोः कर्दणविधौ कांचनीं सौवर्णीं कांचीं क्षुद्रघंटिकां याचयिष्ये इति॥ प्रच्छ

सामान्यवनितावासकसज्जा यथा॥ ॥ चोलं नीलनिचोलकर्षणविधौ चूडामणिं चुंबने याचिष्ये कुचयोः
करार्पणविधौ कांचीं पुनः कांचनीं॥ इत्थं चंदनचर्चितैर्मृगमदैरंगानि संस्कुर्वती तर्ह्लि चित्तमनोरथं
वितनुते वारेषु वारांगना॥ ७२॥ ॥ सदा सा कूताज्ञाकरप्रियतमा स्वाधीनपतिका॥ ॥ अस्याश्चे
ष्टा॥ ॥ वनविहारादिमदनमहोत्सवमदाहंकारमनोरथाऽवाप्तिप्रभृतयः॥ ॥ ८७॥ ॥ ८७॥ ॥

दपटः चोलः कार्पासकोस्त्रियामित्यमरः॥ शार्दूलविक्रीडितं॥ ७२॥ अथ स्वाधीनपतिकां दर्शयन्नाह॥ सदा सा कूतेति॥ स
दा सर्वदा सा कूतेन अभिप्रायेण आज्ञां करोति एवंभूतः प्रियो यस्याः स्वाधीनपतिका॥ अस्याश्चेष्टा॥ वनविहारे स्वादयः॥
मदो हर्षः अहंकारः स्वस्मिन्नत्याजित्वबुधिः॥ रोषं स्फष्टं॥ ७२॥ ॥ श्रीराम जयराम जयजयराम॥ ॥ श्रीकृष्ण॥ ॥

स्या२

मुग्धांस्वाधीनपतिकामुदाहरति॥ मध्य इति॥ काचित्सखीं वदति॥ हे सखी मध्ये कटिप्रदेशे कृशिमा कृशत्वं न॥ वा पुनः देहे कांतिमा न॥ लावण्यविशेषः॥ श्रोणौ नितंबे प्रथिमा पृथुत्वं न॥ गतौ गमने जडिमा जडत्वं न॥ मंदगतित्वं नेत्यर्थः॥ नयने नेत्रे वक्रिमा वक्रत्वं न॥ लास्ये नृत्यगीतवाद्यात्मके दृढिमा दृढत्वं न॥ वा[illegible]चि विषये पटिमा पटुत्वं न॥ हास्ये हासने स्फीतिमा प्रागल्भं न॥ सर्वत्र मुग्धत्वं हेतुरिति भावः॥ गेहे प्येवं तथापि प्राणेश्वरमनङ्गं प्येवमञ्जति ल्कीनं भवति तत्र किं कारयामि नञ्ज्ञानेइत्यर्थः॥ कां

मुग्धा स्वाधीनपतिका यथा॥ ॥मध्ये न कृशिमास्तने न गरिमा देहे न वा कांतिमा श्रोणौ नो प्रथिमा गतौ न जडिमा नेत्रे न वा वक्रिमा॥ लास्ये न दृढिमा न वाचि पटिमा हास्ये न वा स्फीतिमा प्राणेशास्तथापि मञ्जति मनो मय्येव किं कारयं॥७३॥ ॥मध्या स्वाधीनपतिका यथा॥ ॥यदपि रतिमहोत्सवे न कारो यदपि कृपेयानीवि धारणानि॥ प्रियसखि पतिरेष पार्श्वदेशं तदपि न मुंचति चेत् किमाचरामि॥७४॥

तिमा वक्रिमा स्फीतिमा इत्यत्र मनिच्प्रत्ययश्चिंत्यः॥ शार्दूलविक्रीडितं वृत्तं॥७३॥ मध्यां स्वाधीनपतिकामुदाहरति॥ यदपीति॥ हे प्रिय सखि प्रिया चासौ सखी च तत्संबोधनं॥ रतिप्रीतिमहोत्सवे संभोगक्रीडायां यद्यपि नकारो निषेधः॥ च पुनः करेण यद्यपि नीविधारणानि ग्रंथिवसनानि तदपि तथापि एषः पतिः प्रियः पार्श्वदेशं चेत् यदि न मुंचति तर्हि किं आचरामि॥ अलः किं कर्तव्यमित्यर्थः॥ तत्वं शिक्षयेति शेषः॥ पुष्पिताग्रा छंदः॥७४॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥७॥ ॥

चेतू

रसमं॰टी॰
२६

वक्रस्येति ॥ काचित्सखीवदति ॥ हेस

प्रौढां स्वाधीनपतिकामुदाहरति ॥ [illegible] खि कांतः प्रियः कस्याश्चिन्नायिकायाः धन्यानां अरविंदसुंदरदृशां इतरासां नायिकानां कोतास्फूर्तिकरणाद्धन्यत्वं अरविंददृक्त्वं च कथितं ॥ वक्रस्य मुखस्य अधरपल्लवस्य वचसो वचनस्य हासस्य हासरसस्य स्फूर्तिं करोति वक्रादौ सर्वत्र संबंधः ॥ किंतु मे दयितस्य वल्लभस्य स्वप्नेनापि जाग्रदनुभवः संस्कारः ॥ स्वप्नेनापि कापि अन्यनायिका श्रुतिपथं कर्णमार्गं चेतःपथं मनोविषयं दृक्पथं दृग्विषयः न गच्छति न प्राप्नोति ॥ प्रत्यक्षतः किमुत [illegible] ॥ तस्मात्तादृशास्य भेदग्रहः कथं अस्तु तेन सह केनापि निमित्तेन भिन्नत्वं भवत्वित्यर्थः ॥ शार्दूलविक्रीडि

प्रौढास्वाधीनपतिकायथा ॥ ॥ वक्रस्याधरपल्लवस्य वचसो हास्यस्य लास्यस्य वा धन्यानामरविंदसुंदरदृशां कां न स्मनोति स्फूर्तिं ॥ स्वप्नेनापि न गच्छति श्रुतिपथं चेतःपथं दृक्पथं काप्यन्या दयितस्य मे सखि कथं तस्यास्तु भेदग्रहः ॥ ७५ ॥ ॥ परकीयास्वाधीनपतिकायथा ॥ ॥ स्वीयाः संति गृहे सरोरुहदृशो यासां विलासकणात्कांचीकुंडलहेमकंकणझणत्कारेणी विश्राम्यति ॥ कोहेतुः सखि काननेपुरपथे सौधे सखी संनिधौ भ्राम्यंती मयि वल्लभस्य ७७

तं ॥ ७५ ॥ परकीयां स्वाधीनपतिकामुदाहरति ॥ स्वीया इति ॥ काचित्सखी वदति ॥ हे सखि स्वीयाः आत्मीयाः सरोरुहदृशो गृहे संति भवंति यासां स्वीयानां विलासकराभिनयनादिनाक्वणतां कांचीकुंडलहेमकंकणानां झणत्कारेण विश्राम्यति न त्र कुंडलं कर्णभूषणं हेमकंकणं सुवर्णप्रधानं तत्र को हेतुः किं कारणं कानने वने पुरपथे पुरस्य पंथास्तस्मिन् सौधे सुधया स्वर्णनानिर्मितः सौधः तस्मिन् धवलगृहे सखीनां संनिधौ मम वल्लभस्य दृष्टिः मां परितः सर्वतो भ्राम्यतीनमुंचतीन त्यजति ॥ लज्जानामीत्यर्थः ॥ अत्र स्वीयाभ्यः स्वाधिक्यकथनेन व्यतिरेकालंकारः ॥ शार्दूलविक्रीडितं छंदः ॥ ७६ ॥

मे

राम
२६

सामान्यवनितां स्वाधीनपतिकां दर्शयति ॥ संस्येवेति ॥ काचित्सखी वदति ॥ मृगदृशः प्रतिमंदिरं मंदिरे इति वीप्सायाम् अव्ययीभावः ॥ संस्येव भवं संस्येव ॥ यासां मृगदृशां सुधासागरोऽमृतसमुद्रस्तस्य स्रोतः सुस्यूतं लग्नं यत्सरोजं कमलं तद्वत्सुंदरः चमत्कारो येषां ते एवंविधाः दृशो विभ्रमाः विलासाः किंतु चित्रं आश्चर्यं ॥ युवा तरुणः प्रियः वैचित्र्यमन्मथकलानां वैशिष्ट्यहेतोः उत्कर्षकारणात् पुनर्वारंवारं मय्येव चित्तहरं वित्तं प्रयच्छति ददाति ॥ किंकारणात् तन्न जानामीत्यर्थः ॥ शार्दूलविक्रीडितं ॥

सामान्यवनितास्वाधीनपतिका यथा ॥ ॥ संस्येव प्रतिमंदिरं मृगदृशो यासां सुधासागरस्रोतस्स्यूतसरोजसुंदरचमत्कारा दृशो विभ्रमाः ॥ चित्रं किंतु विचित्रमन्मथकलाकौशल्यहेतोः पुनर्वित्तं चित्तहरं प्रयच्छति युवा मय्येव किंकारणं ॥ ७७ ॥ ॥ स्वयमभिसरति प्रियमभिसारयति वा या सा अभिसारिका ॥ ॥ अस्याश्चेष्टा ॥ ॥ समयानुरूपमितभाषणादिशंका प्रज्ञानैपुण्यं कपटहास्यादयः इति परकीयायाः ॥ स्वीयायास्तु प्रकृता एव

॥ ७७ ॥ अथ अभिसारिकां दर्शयति ॥ स्वयमिति ॥ अभिसारयतीत्यादिना प्रियमानयतीत्यर्थः ॥ उक्तं च ॥ कामार्ताभिसरेत्कांतं सारयेद्वाभिसारिकेति ॥ स्पष्टमन्यत् ॥ अस्या अभिसारिकायाः समयानुरूपेत्यादि स्पष्टं ॥ स्वीयापरकीययोरभिसारचेष्टितं सममलमाह ॥ इतीति ॥ इति उक्तप्रकारेण परकीयायाश्च क्रमो अभिसारव्यापारः प्रकृता एव उद्दिष्ट एव ॥ ७७ ॥
या॰

मुग्धाऽभिसारिकायथेति दर्शयति॥ इतीति॥ काचित्सखी वदति॥ हेमुग्धे अयं दयिताभिसारसमयः दयिते अभिसारणयोगः समयो जातः प्राप्तः त्रपां लज्जां मुंच॥ समयमाह॥ विधुरुदूतीउपागता समीपं प्राप्ता॥ पुनः सहस्थायिनी सह तिष्ठति तथाभ्रे तासहचरी सखी रात्रिः॥ दैवज्ञो दैवं भाग्यं जानाति तथाभूतो ज्योतिर्वित् जलदो मेघः स्वनेन शब्देन शुभां प्रस्थानवेलां दिशति कथयति॥ पुनस्तिमिरो तमोपि अंधकारसमूहोपि झिल्लीरवैः भृंगारिध्वनिभिः मांगलीं मंगलनिमित्तां वाचं तनोति

मुग्धाऽभिसारिकायथा॥ ॥ दूतीविधुरुपागता सहचरी रात्रिः सहस्थायिनी दैवज्ञो दिशति स्वनेन जलदः प्रस्थानवेलां शुभां॥ वाचं मांगलिकीं तनोति तिमिरस्तोमोऽपि झिल्लीरवैर्जातोयं दयिताभिसारसमयो मुग्धे विमुंच त्रपां॥ ७८॥

मुग्धाऽभिसारिकायथा॥ भीतासि नैव भुजगात्पथि मद्भुजस्य संगे पुनः कपिमं कमुरीकरोषि॥ अंभोधरध्वनिभिरश्रुभिर्नासि तन्वि मद्वाचि साचि वदनासि किमाचरामि॥ ॥७९॥ ॥८०॥ ॥८०॥ ॥८०॥ ॥८०॥

विस्तारयति॥ यथा कस्यचिज्जिगीषोर्यात्रासमये मंगलं विस्तारयते इत्यर्थः॥ शार्दूलविक्रीडितं वृत्तं॥ ७८॥ मुग्धाऽभिसारिका यथेत्युदाहरति॥ भीतासीति॥ काचिन्नायिकां वदति॥ हे कांते पथि मार्गे भुजंगात्सर्पात् नैव भीतासि॥ पुनः मद्भुजस्य संगे संबंधे किमपि ईषदपि कंपं करोषि सात्त्विकभावोदयादिभावः॥ कुरर्युरश्चौरश्चेत्यपि पाठात्॥ उरीतिविस्तारे प्रयोगः स्थिरांत्यः॥ तथा अंभोधरध्वनिभिः अश्रुभिर्नासि॥ पुनः मद्वाचि मम वचने इत्यर्थः साचि वदनासि दर्शयसि कुत वदना भवसि किं

उरी॰

आनंदरागाणि किमकरमसु दुसंरचय न मा न ज्ञातिमवदभि॥
वमगालिसकरौ॥ ८०॥

कथय

प्रोक्ताऽभिसारिका यथा दर्शयति॥ स्फुरदुरसिजेति॥ अ॰ यात्र पद्ये कथमपि यदि मनोरथो अभिलाषो रथो नस्यात् न भवेत्॥ सु
संप्रत्यलिंगत स्ही स्फुरदुरसिज भारभंगुरांगी स्फुरंती उरसि जौस्तनौ तयोर्भारेण भंगुरं नम्रं अंगं यस्याः सा भवति॥ किंलं सु
यवत् कोमला कांतिर्यस्य तेन पदेन निशास्फुरात्रिषु कथं केन प्रकारेण यागंतुं सहेत गमनं सहाप्रवेदित्यर्थः॥ प्रश्नका [illegible] थार्थ
इत्यर्थः॥ पुष्पिताग्रा छंदः॥ ८०॥ परकीयाऽभिसारिका यथोदाहरति॥ रभसादिति॥ हे सखि रभसात् कांतमिलनोत्कंठ्यात् अ
भिसर्तुं कांतं प्रत्यभिगंतुं उद्यतानां अत्यनुरागवतीनां योषितां वारिदो मेघः विवस्वान् सूर्यः॥ रजनी रात्रिर्दिवः॥ अंधकारः अर्चिः

अगम्याऽभिसारिका यथा॥ ॥स्फुरदुरसिजभारभंगुरांगी किसलयकोमलकांतिनापदेन॥ अथ कथय कथं सहेत गंतुं
यदि न निशासु मनोरथो रथः स्यात्॥ ८०॥ ॥परकीयाऽभिसारिका यथा॥ ॥रभसादभिसर्तुमुद्यतानां वनितानां स
खि वारिदो विवस्वान्॥ रजनी दिवसोंधकारमर्चिर्विपिनं वेश्म विमार्ग एव मार्गः॥ ८१॥ ॥ज्योत्स्नाऽभिसारिका यथा॥
चंद्रोदये चंदनमंगकेषु विहस्य विन्यस्य विनिर्गतायाः॥ मनो निहंतुं मदनोपि बाणान् करेण कौंदान् बिभरां बभूव॥ ८२॥

प्रकाशं तेजः विपिनं वनं वेश्म गृहं॥ विमार्गः अपंथाः स एव मार्गः॥ वनिता जनितात्यर्थानुरागा यां योषिती त्यमरः॥ औपच्छंद
सिकं छंदः॥ ८१॥ तमिस्राऽभिसारिकोक्ता॥ ज्योत्स्नाभिसारिका यथोदाहरति॥ चंद्रोदय इति॥ चंद्रोदये अंगकेषु प्रियविरहतनु
त्वेन अनुकंपानि अंगकानि तेषु अनुकंपान् चंदनं विन्यस्य आलिप्य चंद्रकिरणसमानत्वेन कोपि मां न ज्ञास्यतीति धिया भा
वः॥ विहस्य कांतसंगमेनात्मानं सुखयिष्यामी [illegible] त्यौत्कंठ्येति भावः॥ विनिर्गतायाः कांतं प्रत्यभिसृतायाः
नायिकायाः मनो पि मदयति हर्षयती त्येवंभूतो पि मनो निहंतुं करेण कौंदान् कुंदस्यावयवान् पुष्पान् कौंदास्तान् बाणान् बि
ति३

55

रसमं॰टी २६

द्दिवाभिसारिकायथेत्युदाहरति ॥ पल्लीनामिति ॥ सप्रजेनाः मिथः परस्परं कृतमहोत्सवं कृतोमहोत्सवो यस्यां क्रियायां तद्यथा तथा
पुरः अग्रेप्रस्थिताः ॥ आमंत्रकग्रहं चलिताः ॥ कृसति ॥ पल्लीनामल्पग्रामाणामधिपस्य स्वामिनः पंकजदृशां स्त्रीणां सर्वोत्सवामं
त्रणे पर्वणि पौर्णमास्यादौ यः उत्सवस्तदर्थमामंत्रणं तस्मिन् जातेसति ॥ अत्रांतरे सव्याजं किंचिदपि दित्वयस्थितयोः पुनर्विहस्यम
नोरथावाप्त्यानंदेनेतिभावः ॥ … तं अंतः अंतःपुरगतयोः प्राप्तयोर्यूनोर्युवतीच युवाच तयोर्यूनोः ॥ पुनः स्विन्नकपोलयोः ॥
परस्परांगसंगमेन सत्वादिकभावोदयादितिभावः ॥ कोप्येव … लक्षितुमशक्यः ॥ कंठग्रहो यहणमिति यावत् ॥ विजये विशेषे
णजयति न विरमतीत्यर्थः ॥ अत्र चांतःपुरप्रत्यभिसरणेनाभिसारिकेयं ॥ शुद्धांतश्चावरोधश्चेत्यमरः ॥ पल्लीकुटी … ग्रामयोः रि

द्दिवाभिसारिकायथा ॥ ॥ पल्लीनामधिपस्य पंकजदृशोपूर्वोत्सवामंत्रणे जातेसप्रजनामिथः कृतमहोत्साहं पुरःप्र
स्थिताः ॥ सव्याजं स्थितयोर्विहस्यगतयोः शुद्धांतमंत्रांतरे यूनोः स्विन्नकपोलयोर्विजयते कोप्यषकंठग्रहः ॥ ५२ ॥
सामान्यवनिताऽभिसारिकायथा ॥ ॥ लोलच्चोलच्चमत्कृतिप्रविलसत्कांचीलताझंकृतिश्चंचत्कंचुकबंधुबंधुरस्व
लद्वक्षोजकुंभोन्नति ॥ स्फूर्जद्दीधितिविस्फुरत्कृतिचलच्चामीकरालंकृतिक्रीडाकुंजगृहं प्रयातिकृतिनः कस्यापि वारां
तिविभ्रवः ॥ शार्दूलविक्रीडितं ॥ ५३ ॥ सामान्यवनिताऽभिसारिकायथेत्युदाहरति ॥ लोलच्चेति ॥ वारांगनावेश्या कस्यापि कृतिनो
धन्यस्य क्रीडाकुंजगृहं प्रयाति ॥ अभिसरति कथं प्रयातीति अतआह ॥ लोलंती चंचला चोलस्य प्रच्छादपटस्य चमत्कृतिच
मत्कारोयस्यां क्रियायां तद्यथास्यात्तथा ॥ पुनः … प्रवि… लसत्कांचीलतायाः कृतिर्यत्रक्रियायांतत् ॥ पुनः चंचत्गाढोयः कुचस्य
बंधस्तेनबंधुरानम्रा चलंतीमंडिता वक्षोजकुंभस्य उन्नतिर्यत्रक्रियायांतत् ॥ पुनः स्फूर्जती विलसंती दीधितिः कांतिविशेषोयत्र
क्रियायांतत् ॥ पुनः विस्फुरंती या गंडस्थली चलच्चपला चामीकरालंकृतिः सुवर्णालंकारोयत्रक्रियायांतत् ॥ सर्वाण्यपिक्रि

स३ झं३

संप्रतिपरिशेषयति ॥ मुग्धाया इत्यादिशेषांतं स्पष्टं ॥ तत्र प्राकारं यं प्रागल्भ्यं ॥ एवं प्राचीनपद्धतिं प्रदर्श्य इदानींनवीनमभिधातु
तस्यापन्यासपूर्वकमाह ॥ प्रस्थानमिति ॥ काचित् ग्रीष्म[illegible]क्षणा करिष्यमाणगमनकालवियोगेन विक्लवा नायिका जीवितं प्रतिवद
ति ॥ हे जीवितप्रियतमेन या तुं गंतुं निश्चितं चेतसि निश्चितं चेतो यस्य तस्मिन् प्रियतमे सति ॥ ते सर्वे समं समकालमेव प्रस्थिताश्चलि: ल३
ताः ॥ ते के तत्राह ॥ प्रियसखैः प्रियाश्च ते सख्याश्च समीपकर्त्वा तु ॥ ते वलयैः कंकणैः प्रस्थानं कृतं लक्ष्यणामेव क्षीयात्वप्राप्त्या

मुग्धाया लज्जाप्राधान्येन ॥ मध्याया लज्जामदनसाम्येन ॥ प्र[illegible]गल्भायाः प्रकाशप्राधान्येन ॥ धीराया धैर्यप्राधान्ये
न ॥ अधीराया अधैर्यप्राधान्येन ॥ धीराधीरायाः धैर्याधैर्यप्राधान्येन ॥ ज्येष्ठायाः स्नेहाधिक्यप्राधान्येन ॥
कनिष्ठायाः स्नेहन्यूनत्वप्राधान्येन ॥ परोढायाः संयुक्तिप्राधान्येन ॥ मुग्धाया इव कन्यकायाः ॥ सामान्यवनितायाः
धनप्राप्तिप्राधान्येन अष्टवि[illegible]धनायिकावर्णनमिति विशेषः ॥ ॥ प्रस्थानं वलयैः कृतं प्रियसखैरस्रैरजस्रं गतं धृ
त्या न क्षणमासितं व्यवसितं चित्तेन गंतुं पुरः ॥ गंतुं निश्चितचेतसि प्रियतमे सर्वैः समं प्रस्थितं गंतव्ये सति जीवित
प्रियसुहृत्सार्थः किमु त्यज्यते ॥८५॥ ॥ हरे राम हरे राम रामरामरा हरे हरे ॥ हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण कृष्ण ह

अधोनिर्जितमित्यर्थः ॥ पुनः अस्रैः रुधिरैः अश्रुभिर्वा अजस्रं संततं गतं चलितं ॥ पुनर्धृत्या धैर्येण क्षणमपि नासितं न स्थि
तं ॥ पुनश्चित्तेन पुरस्तादग्रत एव गंतुं व्यवसाये उद्यमः कृत इत्यर्थः ॥ विवक्षितमाह ॥ गंतव्ये सति प्रियं विना स्थातुमशक्य
त्वादित्यर्थः ॥ प्रियसुहृत्संघातः किमु वितर्के उत्सृज्यते ॥ परित्यज्यते ॥ सार्थांतरत्वात् न विलंबनीयमित्यर्थः ॥ सार्थ
संघातमात्रके इति विश्वः ॥ ८५ ॥

इत्यादीत्यादि॥अग्रिमक्षणेऽग्रेभाविनीत्यर्थः॥प्रोष्यत्पतिकेति॥अंधपरंपरया दुष्टोयंपाठः॥ लटिचसनेरुष्यदित्यसिद्धेः॥
केरिप्रयुक्त[illegible]श्रिंत्यः॥किंतुवत्स्यत्पतिकेतिवक्तव्यं॥नवमीनवानांपूरणी॥तथाहीति तदेवप्रदर्शतइत्यर्थः॥अन्यद्युक्तमुत्प
इत्यादि प्राचीनग्रंथकारलेखनात्॥ ॥अग्रिमक्षणेदेशांतरनिश्चितगमनेप्रेयसिप्रोष्यत्पतिकापिनवमीनायि
काभवितुमर्हति॥ ॥तस्याःप्रोषितपतिकाविप्रलब्धोत्कासुनांतर्भावः॥ ॥भर्तुःसन्निधिवर्तित्वात्॥ ॥नकलहां
तरितायामंतर्भावः॥ ॥प्रियस्योपभोगचिन्हितत्वाभावात्॥प्रियायाःकोपाभावदर्शनात्॥काकुवचनकालरक्त
प्रेक्षणादिसूचितांतःपक्षपातदर्शनाच्च॥ ॥नवासकसज्जायामंतर्भावः॥ ॥वारानियमाभावात्॥सज्जी
करणाभावनिश्चितादिदर्शनाच्च॥ ॥नस्वाधीनपतिकायामंतर्भावः॥ ॥अग्रिमक्षणएवसंगविच्छेददर्श
नात्॥नहिस्वाधीनपतिकायाःकदाचिदपिसंगस्यविच्छेदइतिसंप्रदायः॥व्रजन्नपिपतिःस्वाधीनपतिकयानि
रुध्यते॥अन्यथाभर्तुरिस्वाधीनत्वमेवतस्याभज्येत॥ ॥नेहतैतथा॥ ॥सर्वथाभर्तुर्विदेशगमनात्॥किं
चिन्निर्वेदाश्रुपातनिःस्वासवनविहारादिमदनमहोत्सवव्यतिरेकदर्शनाच्च॥ ॥नाप्यभिसारिकायामंतर्भा
वः॥ ॥अभिसारोत्सवाभावात्॥अंतस्तापदर्शनाच्चेतियुक्तमुत्पश्यामः॥ ॥लक्षणंतु॥यस्याःपतिरग्रि
मक्षणेदेशांतरंयास्यत्येवसाप्रोष्यत्पतिका॥ ॥अस्याश्चेष्टा॥ ॥कांश्चनकातरप्रेक्षणगमनविघ्नोपदर्शन

[illegible]

स्यामइत्यंतंस्पष्टं॥उक्तंसमंजसंउत्पश्यामः॥भेदकल्पनंयुक्तमुत्प्रेक्षितमित्यर्थः॥लक्षणंलिखितियस्याइत्यादिबाष्पाद
यइत्यंतंस्पष्टं॥प्रोष्यत्पतिकेतिसर्वत्राप्य[illegible]पाठः॥किंतुप्रवत्स्यत्पतिकेतिसर्वत्रज्ञेयं॥ ॥श्रीरामजयराम जयजयराम॥

तत्रमुग्धांप्रवत्स्यत्पतिकामुदाहरति॥ प्राणेश्वर इति॥ क्षामोदरी कृशोदरी नायिका प्राणेश्वरे कांते निर्गमाय प्रयाणाय किमपि किंचिदपि जल्पति पृच्छति सति आननं मयांचकार॥ लज्जया वक्तुमशक्यत्वादिति भावः॥ पुनः सखी आलि निभृतं मंदं मंदं लतानिकुंजे एत्य उन्मत्तको किलध्वनिं आततान चकारेत्यर्थः॥ मत्तकोकिलपंचमध्वनमाकर्ण्य अयं वसंतागम इति ज्ञात्वा विहरकांतरतयानप्रयास्यतीति बुध्येत्यर्थः॥ वसंततिलकवृत्तं॥ ८६॥ मध्यांप्रवत्स्यत्पतिकामुदाहरति॥ गंतुमिति॥ प्रिये गंतुं वदति पृच्छति सति मृगदृशो नायिका

तत्स्य
मुग्धाप्र ...त्पतिका यथा॥ ॥प्राणेश्वरे किमपि जल्पति निर्गमाय क्षामोदरी वदनमाननमयां चकार॥
आ... लीपुनर्निभृतमेत्य लतानिकुंजमुन्मत्तकोकिलकल ध्वनिमाततान॥८६॥ ॥मध्याप्र ...त्स्य ...त्प
तिका यथा॥ ॥गंतुं प्रिये वदति निःश्वसितं न दीर्घमासीन्नवानयनयोर्जलमाविरासीत्॥ आयु
र्लिपिं पठितुमेणदृशः परं तु भालस्थली किमु कचः समुपाजगाम॥८७॥ ॥८७॥ ॥८७॥ ॥

याः दीर्घनिश्वसितं न आसीत्॥ नाभवत्॥ मृगदृशा इति पदं कातरत्वेनेति भावः॥ नवानयनयोर्जलमाविरासीत्॥ प्रकटीभुव॥ वि
रहजनितदुःखेनेति भावः॥ परं तु कचः केशाः जातावेकवचनं॥ किमु वितर्के॥ आयुर्लिपिं आयुर्लक्षणानि पठितुं भालस्थ ल
लाटप्रदेशं समुपाजगाम॥ आयुर्लिपेस्तत्रवर्त्तमानत्वात्॥ वस्तुतस्तु संश्लिष्टापि कपटविरहचिंतया ललाटपट्टमवतीर्णेति॥ उत्प्रेक्षालंकारः॥ वसंततिलकवृत्तं॥ (८७)

रसमं॰ टी
३०

प्रौढां प्रवत्स्यत्पतिकामुदाहरति ॥ नमुंचतीति ॥ भो यदुपते कुलललनतुल्यागेहे अयं वियोगज्वरः सुभ्रुवां स्त्रीणां न मुंचति तेन हेतुना कृतांजलिः अहं पृच्छामि सत्यं वद ॥ किं तदित्याह ॥ तांबुलं कुसुमं पुष्पं पटीरं चंदनं उदकं च वृंदं धुमि दृश्यते मृतो दृशेनेत्यर्थः ॥ परत्र स्वर्गेपि किमु विषज्वालावलिः दुःसहे अग्निज्वाला च लदुःखेन सह्यतरति ॥ किं तथैव दाहकं भयतीत्यर्थः ॥ पटीरो वातिको केनो रंगेस्नसे चंदने इति विश्वः ॥ शार्दूलविक्रीडितं वृत्तं ॥ ८२ ॥ परकीयां प्रवत्स्यत्पतिकामुदाहरति ॥ न्यस्तमिति ॥ काचित्कांतं प्रतिवदति हे कांत पन्नगमूर्ध्नि पन्नगानां सर्पाणामित्यर्थः ॥ मूर्ध्नि मस्तके पादयुगुलं न्यस्तं त्वदर्थे कालोपि न गणितं इति तात्पर्यार्थः ॥ किं च गु

वत्स्य — प्रौढाप्र[वत्स्य]त्पतिकायथा ॥ ॥ नायं मुंचति सुभ्रुवामपि लतुल्यागेहवियोगज्वरस्तेनाहं विहितांजलिर्यदुपते पृच्छामि सत्यं वद ॥ तांबुलं कुसुमं पटीरमुदकं यद्बंधुभिर्दीयते स्याद्दैवपरत्र तत्किमु विषज्वालावलीदुःसहं ॥ ८२ ॥ ॥

वत्स्यन४ — परकीयाप्रो[वत्स्य]त्पतिकायथा ॥ ॥ न्यस्तं पन्नगमूर्ध्नि पादयुगुलं भक्तिर्विमुक्ता गुरोस्त्यक्ता नीतिरकारि किं न भवतो हेतोर्मया दुःकृतं ॥ अंगानां ज्वरातयातनानेत्रयोः कोपि क्रमो रौरवः कुंभीपाकपराभवश्च मनसो युक्तं त्वयि प्रस्थिते ॥ ८३ ॥

सु

रोः श्वशुरादेः भक्तिः सेवा विमुक्तेत्यर्थः ॥ पुनः नीतिं कुलमर्यादां त्यक्ता ॥ भवतो हेतोर्मया किं न दुःकृतं अकारि ॥ सर्वमपि कृतमित्यर्थः ॥ त्वयि प्र[स्थि]ते प्रस्थिते सति युक्तं त[त्] दृक्ष्यमाणमित्यर्थः ॥ अंगानां यातनानां असंख्याती व्रवेदना यातना तीव्रवेद[ना] स्मरः ॥ पुनः नयनयोः कोपि रौरवक्रमः रौरवनामयातनावि[शेष]सरत्यर्थः ॥ यद्वा रुरुः श्वेतोलमृगः क्रूरो रयं रौरवक्रमं तद्दृगमनं पश्यतो मनःज्ञो वनं यास्यतीत्यर्थः ॥ च पुनः कुंभीपाकपराभवः कुंभीपाकनरकरूपी जाचेत्यर्थः ॥ यद्वा कुंभ्यां कलस्यां पाको विक्कुद्दस्ता तत्पराभवः ॥ यथा अग्निना कुंभ्यां पच्यते ॥ तथा [illegible] विरहाग्निना तस्या मे नरौ मनसो यथा भविष्यतीति

न्या२ रा७४

रा
३

सामान्यवनितां प्र वत्स्यत्पतिकामुदाहरति ॥ मुद्रामिति ॥ वारांगना वेश्या विगलन्नयनांबुधारा विगलंती नयनांबुधारा यस्याः सा इत्थं अनेन प्रकारेण निगद्य प्रियतमं करयोर्बभार दध्रे ॥ इत्थं कथं ॥ हे प्रिय वलयाय वलयं कंकणं कर्तुमित्यर्थः ॥ मुद्रां अंगुलीयं प्रदेहि ॥ यतः एतद्वलयं भवद्वियोगं आसाद्य प्राप्य सहसा आकस्मिकं बहिर्यास्यति पतति ॥ इति शेषः ॥ वसंततिलकछंदः ॥ ८४ ॥ अथोन्नम ... त्वादिभेदान्निरूपयति ॥ अहितकारिण्यपीति ॥ अस्या उत्तमायाः स्वरूपं ॥ यथेति तामुदाहरति ॥ पतिरिति ॥ वामभ्रुवा वामे सुंदरे भ्रुवौ यस्याः सा तया कुचविचित्रितोरस्थलः कुचाभ्यां विचित्रितं सपत्न्यालिंगनेनेति ॥ पतिरिति ॥ ...

वत्स्य सामान्यवनिताप्रवत्स्यत्पतिका यथा ॥ ॥ मुद्रां प्रदेहि वलयाय भवद्वियोगमासाद्य यास्यति बहिः सहसा यदेतत् ॥ इत्थं निगद्य विगलन्नयनांबुधारा वारांगना प्रियतमं करयोर्बभार ॥ ८४ ॥ ॥ अहितकारिण्यपि प्रिय नमे हितकारिण्युत्तमा ॥ ॥ अस्या उत्तमैव चेष्टा ॥ ॥ यथा ॥ ॥ पतिः शयनमागतः कुचविचित्रितोरस्थलः प्रसन्नवचनामृतैरयमतर्पि वामभ्रुवा ॥ अचर्चि सुभगस्मितैर्द्युतिपटीरपंकद्रवैरपूरि विलसद्विलोचनचमत्कृतैरंबुजैः ॥

भावः ॥ उरस्थलं यस्य स एवंभूतः पतिः शयनं शय्यां आगतः प्राप्तो ऽयं प्रसन्नानि वचनानि तान्येवामृतानि तैः अतर्पि प्रीणितः ॥ पुनः सुभगायाः स्मितद्युतयस्ता एव पटीरपंकद्रवाः चंदनकर्दमरसास्तैराचर्चि चर्चितः ॥ पुनः विलसती विलोचने तयोश्चमत्कृतानि कांतिच्छटाः लतावि ... शेषास्तान्येव इंदीवराणि नीलकमलानि तैरापूजितः ॥ एनिष्कपटा चोर्दहि कद्रव्यैरेव संमानीतः ॥ पतिरित्यस्या उत्तमत्वं ॥ चमत्कृतैरंबुजैरिति समीचीनः ॥ रोपे असमंजसत्वात् ॥ वामं सव्ये प्रतीपे चंद्र विणो चातिसुंदर इति विश्वः ॥ पृथ्वीछंदः ॥ ८५ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

ली

रा

कंचुर

रस॰मं॰री ३१

अथ मध्यमा॥ हिताहितकारिणीत्यादि चेष्टां तल्लक्षणं। यथेति तामुदाहरति॥ कांतेति॥ सागसि सापराधे कांते कंचुकस्पृशि
कंचुकं स्पृशतीति तस्मिन्सति सा चीकृतग्रीवया साचीकृता वक्रीकृता ग्रीवा यया तया नायिकया कोपेन कषायाः ईषद्रक्ताः मन्म
थशरवत् अंकुराः कटाक्षांकुराः तारकागतागतविश्रांतिरूपावलोकनच्छटा मुक्ताः प्रेरिताः॥ च पुनः साकूते साभिप्राये चा
टुकारिणि सतीत्यर्थः॥ सुभ्रुवा शोभने भ्रुवौ यस्याः सा तया काचित् अपूर्वा कल्पलतारीतिः मनोरथसंपादकत्वान्न क

हिताहितकारिणि प्रियतमे हिताहितचेष्टावती मध्यमा॥ ॥अस्याः कृ व्यवहारानुसारिणी चेष्टा॥ ॥
यथा॥ ॥कांते सागसि कंचुकस्पृशि तया साचीकृतग्रीवया मुक्ताः कोपकषायमन्मथशरांकुराः कटाक्षां
कुराः॥ साकूते दरहासकेसरवचोमाध्वीकधारालसत्प्रीतिः कल्पलता च काचन महादानीकृता सुभ्रुवा॥ ८६॥

रा॰ ३

ल्पलतेत्युक्तं॥ महादानीकृता प्रीतये अधिकत्वेन तदालस्यमह ताकिं ता प्रीतिः॥ दर ईषत् हास एव किंजल्को यस्मिन् ए
वंरूपं यद्वचस्तदेव माध्वीकं मधु तस्य धाराप्रसृतिः तया अलसा निर्भरता कल्पलतामपि मधुके रसयुता भवति॥ द
रहासकदेति प्रियविशेषणे दरो हासो यस्मिन् रसो माधुर्यादिस्तद्युक्तो वचस्तद्धारया नेप्रियहासस्यानुपयुज्यमान
त्वादसमंजसं॥ शार्दूलविक्रीडितं वृत्तं॥ ८६॥ ॥हरे राम हरे राम राम राम हरे हरे॥ ॥हरे कृष्ण हरे कृष्ण हरे कृष्ण॥

अथअधमा॥ हितकारिण्यपीतिचेष्टांतंस्पष्टं॥ तत्रचंडीपनस्त्रीषु संमतेतिविश्वः॥ यथेत्यधमामुदाहरति॥ प्रस्थानइति॥ हे सखियोनायिकेः प्रस्थानेपुष्पत्रोटनादिनिमित्तगमनेत्ववशातत्तयाश्रीखंडद्रव्यस्यचंदनरसस्यपुरोअग्रेमार्गस्सिंचति॥ तस्मिन्श्रेयसिअतिशयप्रियेभुयःपुनर्द्दृशाक्रुध्यति॥ क्रोधंप्रगटयतीत्यर्थः॥ किंभूतया॥ दृशाविद्रुमेति॥ विद्रुमाणांद्रवोनिकूरस्तस्ययानदीतस्यांरिंगतश्चलितोयोभ्रमिभ्रमःआवर्त्तइतियावत्॥ तस्मिन्भ्रांतंभ्रातंक्लांतंयत्सरोजपत्रंतत्सदृशासमा

हितकारिण्यपिप्रियतमेअहितकारिण्यधमा॥ ॥एषैवचनिर्निमित्तकोपनाचंडीत्युच्यते॥ ॥अस्याःनिःकारणकोपत्वादधमैवचेष्टा॥ ॥यथा॥ ॥प्रस्थानेतवयःकरोतिकमलच्छायांमुखांभोरुहेश्रीखंडद्रवधारया=
शिशिरयामार्गंपुरःसिंचति॥ तस्मिन्श्रेयसिविद्रुमद्रवनदीरिंगत्तरंभ्रमिभ्रांतक्लांतसरोजपत्रसदृशाभूयो गः
दृशाक्रुध्यति॥८७॥ ॥विस्तरभयात्प्रत्येकमेतासामुत्तममध्यमाधमभेदानोदाहृताइति॥ ॥विश्वासविश्रामकारिणीपार्श्वचारिणीसखी॥ ॥अस्यामंडनोपालंभशिक्षापरीहासप्रभृतीनिकर्माणि॥ ॥श्रीदृशम॥

नया॥ विद्रुमोरत्नकोदंडप्रवालोवालवोलवइतिविश्वः॥ स्यादावर्तोंभसांभ्रमइत्यमरः॥ शार्दूलविक्रीडितंवृत्तं॥८७॥ विस्तरभयात्ग्रंथविस्तारभयात्प्रत्येकमेतासामितिएतासांपूर्वोक्तानांप्रत्येकंएकंएकंप्रतिप्रत्येकं उत्तमाद्याः॥ उदाहरणत्वेनोक्ताइत्यर्थः॥ एवंनायिकानिरूप्यतत्सख्यादिसहायिनीरपिनिरूपयन्सखींदर्शयति॥ विश्वासेति॥ विश्वासविश्रामौकरोतीतिसापार्श्वेसमीपेचरतीतियासखी॥ अस्याःसख्याःमंडनंअलंकारःस्वतःउपालंभःसनिंदंवचनविशेषःशिक्षाउपदेशः

परिहासः॥ यः सविदा उपालंभ इत्यमरः॥

रसमं॰टी॰

३२

ही

तत्रमंडनमुदाहरति॥स्त[illegible]नेति॥कमलमुखीनायिकाकमलैःसखींजघानकौतुकेनताडनंचकारेत्यर्थः॥किंभूतासखी॥स्तनकनकेति॥स्तनएवकनकम[illegible]धरःस्वर्णपर्वतःतस्यउपकंठेसमीपेमकरिकायामिषात्व्याजात्उल्लुसन्प्रमोदंउल्लुसन्प्रमोदोयस्यसतं[illegible]सखी॥प्रियस्यकरपल्लवंरहसिएकांतेलिखंती॥पुष्पिताग्राछंदः॥८८॥उपालंभमुदाहरति॥सांद्रघनेरिति॥हेनाथस्वामिन्सांद्रघनैर्निरंतरध्वनिभिर्मुखरिताःदिशोयाभिस्ताःस्तोयदानांमेघानांश्रेणयःपंक्तयःधरासारैःधराणां आसारैःसंपातैःधर[illegible]णीमंडलंभूमंडलंसर्वतःप्लावयंतितेनउत्कहेतुनामत्सखीमुत्कमेकअरवंडितमेवविपुलंमहांतंस्नेमंडनंयथा॥ ॥स्तनकनकधराधरोपकंठेप्रियकरपल्लवमुल्लसत्प्रमोदं॥रहसिमकरिकामिषाल्लिखंतीकमलमुखीकमलैःसखींजघान॥८८॥ ॥उपालंभोयथा॥ ॥सांद्रध्वानैर्मुखरित[illegible]दिशःश्रेणयस्तोयदानांधारासारैर्धरणीवलयंसर्वतःप्लावयंति॥तेनस्नेहंवहतिविपुलंमत्सखीयुत्कमेतत्त्वंनिःस्नेहोयदसितदिदंनाथमेविस्मयाय॥८९॥ ॥शिक्षायथा॥ ॥सानंदमालिवनमालिविलोकनायनिर्गच्छकुंजमितिकिंनुविचारयेथाः॥झंकारिणोमधुलिहोदिवसेभ्रमंति[illegible]रात्रौपुनश्चपलचंचुपुटाश्चकोराः॥९०॥ ॥श्रीकृष्णजयकृष्णजयजयकृष्ण॥हंवहति॥मद्वियोगमसत्कुर्वतोमेघावलोकनेनसमागमिष्यतिमत्प्रीतयेतिभावः॥त्वंनिःस्नेहःस्नेहरहितःतेनइदंमेममविस्मयायआश्चर्यायतादृशोजनेभवानेवंविधइतिविस्मयस्यार्थः॥मदाक्रांताछंदः॥८९॥अथशिक्षामुदाहरति॥सानंदमिति॥काचित्सखीवदति॥हेआलिसखिवनमालीविलोकनायश्रीकृष्णदर्शनायसानंदंयथातथा॥कुंजंनिर्गच्छकिंनुइतिविचारयेथाः॥विचारंकुर्वीथाः॥किंतत्राह॥झंकारिणोझंकारध्वनियुक्ताःमधुलिहोभ्रमराःदिवसेभ्रमंति॥पुनःरात्रौचपलानिचंचुपुटानियेषांतेचकोराःचंद्रिकाप्रियाःभ्रमंतीत्यर्थः॥तवांगसौगंध्यमुखचंद्रिकास्वादनार्थंभ्रमद्भ्रमामधुलिट्चकोरशब्दा

स्मितद्युतिभिरुत्तरयांचकार

परिहासमुदाहरति॥ अगारेति॥ सीता जानकी इत्थं सखीजनस्य वचः श्रीराममुद्दिश्योक्तं प्रतिपद्य प्राप्य स्मिते त्यर्थः। इत्थं कथं॥ आगारं गृहं तद्भित्तिलिखिताः फलौ कभर्तुः [illegible] दश मत्स्य दशसु मूर्तिषु मत्स्य कूर्म वराह नारसिंह वामन परशुराम श्रीराम बलराम बुद्ध कल्की स्वरूपासु सक्षमः कः किंनामेत्यर्थः॥ निवेदयस्व कथयस्व॥ भवनागारमंदिर मित्यमरः॥ वसंततिलक छंदः॥ ९१॥ सख्याः परिहासवत् परिहासतुल्यं प्रियस्यापि परिहासः प्रियकृतपरिहास इत्यर्थः॥ यथेति तामुदाहरति॥ भ्रूसं

पारीहासोयथा॥ ॥आगारभित्तिलिखितासु निवेदयस्व कः सक्षमो दशसु मूर्तिषु लोकभर्तुः॥
इत्थं सखीजनवचः प्रतिपद्य सद्यः सीता स्मितद्युतिभिरुत्तरयांचकार॥ ९१॥ ॥सख्याः परिहास
वत्तु प्रियस्यापि परीहासः॥ ॥यथा॥ ॥भ्रूसंज्ञया दिशसि तन्वि सखीनवाग्भिरित्थं विहस्य मुरवै
रिणि भाषमाणे॥ राधा चिराय रदनव्रणदृश्यमानबिंबाधरा वदनमानमयांचकार॥ ९२॥ ॥

त्वयेति॥ दशनव्रणेन दृश्यमानस्ताम्यमानो बिंबाधरो यस्याः सा राधा चिराय चिरकालं वदनं आनमयांचकार॥ हे तन्वि तनो तिशृंगाररसमिति तन्वी तस्यां [illegible]सं बोधने॥ भ्रूसंज्ञया सखी दिशसि परं वाग्भिर्वचनैर्न दिशसीत्यर्थः॥ इत्थं मुरवैरिणि श्रीकृष्णे विविहस्य भाषमाणे सति॥ अत्र छंदः प्रकारात्वेन हरिहासः॥ वसंततिलकछंदः॥ ९२॥ ॥६७॥ ॥

रसमं·टी·
३३

प्रियस्येत्यादिना प्रियायाः परिहासं यथेति मुंते दाहरति॥ दिव्यमिति॥ शैलभुवा पार्वत्या इत्थं विहस्य लपितः उक्तः शंभुर्वः शिवाय कल्या
णायास्तु॥ दिव्यरूपशपथवादेन हारं निन्हुवानं वदति॥ हे शंभो वारि जलं दिव्यं शपथविशेषः कथं यतः तव मौलौ मस्तके सुरधु-
नीयः शिरसि गंगा वहति तस्य कथं जलमित्यर्थः॥ पुनः पावकोऽग्निः दिव्यं कथं यत्तत तद्विलोचनयोर्नेत्रयोर्ज्ञाग्निर्वहति तस्याग्निः क
थं दिव्यमित्यर्थः॥ पुनः अहिः सर्पः कथं दिव्यं स चाहिः तवांगे यं सर्वालंकारः तस्य कथं सर्पः दिव्यमित्यर्थः॥ तस्माद्द्युतविधौ त्वया मु
षितश्चौरितो हारः परित्यज्यतामिति॥ शार्दूलविक्रीडितं॥९३॥ सखीं निरूप्य अथ दूतीं दर्शयति॥ इत्थेति॥ दूतस्य भावः दूती दूतव

प्रियस्य परिहासवत्प्रियाया अपि परिहासः॥ ॥यथा॥ ॥दिव्यं वारि कथं यतः सुरधुनी मौलौ कथं पावको दिव्यं त
द्धि विलोचने कथमहिर्दिव्यः स चांगे तव। यस्माद्द्यूतविधौ मया द्युमुषितो हारः परित्यज्यतामित्थं शैलभुवा विहस्य ल
पितः शंभुः शिवायास्तु वः॥९३॥ ॥इत्थं व्यापारपारंगमा दूती॥ ॥तस्याः संघट्टनविरहनिवेदनादीनि कर्मा
णि॥ ॥संघट्टनं यथा॥ ॥अंचति रजनिरुदंचति तिमिरमिदं इति वंचति मनोभूः॥ उक्तेन त्यज युक्तं विरचय
रक्तं मनस्तस्मिन्॥ ॥९४॥ ॥कृष्णाय वासुदेवाय हरये परमात्मने॥ प्रणतः क्लेशनाशाय गोविंदाय नमो नमः॥ ॥१॥

रा
३

णिग्भ्यां चेति स्त्रेयाभावे यण्॥ न व्यापारे पारं गच्छतीति पारंगमा॥ तस्या इति॥ संघट्टकारणं द्वयोर्मेलनं॥ द्वयेति तामुदाहरति॥ अंचती

तिर

ति॥ कोचिन्नायिका नयनप्रतिज्ञां दूती प्रवदति॥ हे दूति रजनिः रात्रिः अंचति व्याप्नोति तिमिरं अंधकारं इयं उदंचति उद्गच्छति॥ मनो
भूः कामः चंचति नृत्यति॥ उक्तं यत्॥ उक्तं तद्दृढीकरणादिरूपमित्यर्थः॥ न त्यज न विस्मरेत्यर्थः॥ तस्मिन् उक्ते मनो रक्तं
प्रीतियुक्तं विरचय॥ अन्यथा विस्मेरिष्यतीत्यर्थः॥ आर्याछंदः॥ ॥९४॥ ॥श्रीकृष्ण जय कृष्ण जय जय कृष्ण॥

विरहनिवेदनं यथेत्युदाहरति ॥ चक्र इति ॥ हे दृष्टधात्र्या वसुधाधरामंडले चंद्रमुखी राधा नायिका प्रदीपकलिका प्रदीपज्योतिः च
क्रे क्रियते स्म ॥ तावता किं तत्राह ॥ तस्याश्चंद्रमुख्या राधायाः दैववशात् चरमापि दशा अंतावस्थेत्यर्थः ॥ दीपपक्षे दशा वर्त्तिः ॥
प्रायो बाहुल्येन समुन्मीलति सम्प्रयुदैति ॥ तत्ततो हेतोर्नतेन नम्रेण शिरसा उपलक्षिता भ्रमः ॥ सर्वा अपि मिलित्वा निवेदया

विरहनिवेदनं यथा ॥ ॥ चक्रे चंद्रमुखी प्रदीपकलिका धात्र्या धरामंडले तस्या दैववशा
द्दशापि चरमा प्रायः समुन्मीलति ॥ तद्भ्रमः सहसा नतेन शिरसा प्राणेश निक्षिप्यतां स्नेह
स्तत्र तथा यथा न भवति त्रैलोक्यमंधं तमः ॥९५॥ ॥ इति रसमंजर्यां नायिकानिरूपणं ॥

मेत्यर्थः ॥ स्नेहस्याः कस्मिन् तत्र राधारूपदीपकलिका कार्या ॥ तथा तेन प्रकारेण स्नेहः प्रेम निक्षिप्यतां ॥ तथा अंधं त्रैलोक्यं
तया न भवति ॥ भवत्स्नेहं विना सर्वं वस्तु निबिडांधकारतुल्यं तस्या भवतीत्यर्थः ॥ दीपपक्षे ॥ स्नेहस्तैलं तथा तैलाभावे नानि
र्वाण्यायाति च मौरेव स्मापि दीपज्योतिस्तैलदानेन प्रकाशते इत्यर्थः ॥ शार्दूलविक्रीडितं ॥९५॥ ॥ इति रसमंजर्यां टीकायां ना

मू४

रसमं॰टी॰
३४

नायिकां निरूप्य तदानीं नायकं निरूपयति॥ शृंगारस्येति॥ उभयनिरूप्यत्वात्॥ नायिकानायिकयोर्निरूपणीयत्वात्॥ तो पंस्मरं॥ स नायिकस्त्रिविधस्त्रिप्रकारः॥ पतिरित्यादिना॥ उपपतिर्जारः॥ वेश्यो चरतीति वैशिकः॥ जारस्तूपपतिः स्मृतो ... वेश्याजन समाश्रयस्त्वमरः॥ तत्र पतिं दर्शयति॥ अग्न्यादिसाक्षित्वेनेत्यर्थः॥ पतिमुदाहरति॥ त्वमिति॥ शिवो वदति हे पीयूषमयूख पीयूषं अमृतं मयुखाः किरणाः यस्य तत्संबोधनं॥ अंत ... किरण चंद्रेत्यर्थः॥ शिशिराः स्निग्धाः शीतलाः सांद्राः सान्द्रसुधायो अमृ

अथ शृंगारस्योभयनिरूप्यत्वान्नायकोपि निरूप्यते॥ ॥स च त्रिविधः॥ ॥पतिरुपपति वैशिकश्चेति॥ ॥विधिवत्पाणिग्राहकः पतिः॥ ॥यथा॥ ॥त्वं पीयूषमयूख मुंच शिशिरस्निग्धान्सुधाशीकरांस्त्वं भोगींद्र बिलं वसे किमु फणाभोगैः शनैर्व्यजय॥ त्वं स्वर्वाहिनि किं च सिंच सलिलैरंगैः शिरीषोपमैः सेयं शैलसुता कठोरमहसः कां तापशिक्षाम्पति॥ ९६॥

राम
३४

तस्य किरणान् कणान् मुंच॥ हे भोगींद्र सर्पराज किमु बिलं वसे किंतु फणानां भोगैर्विस्तारैः शनैर्व्यजय वायुं जयेत्यर्थः॥ किंच॥ भोस्वर्वाहिनि स्वर्गंगे त्वं सलिलैः सिंच॥ यतः शिरीषोपमैः शिरीषपुष्पतुल्यैरंगैरुपलक्षिता सा इयं शैलसुता पार्वती कठोरमहसः उग्रतेजसः सूर्यस्येत्यर्थः॥ कां तापथिमार्गे क्रामपतिरवेदं प्राप्नोति॥ पीयूष अमृतं सुधेत्यमरः॥ स्निग्धं तमसृणः सांद्र इति ... ईलविक्रीडितं वृत्तं॥ ॥९६॥ ॥श्रीरामजयराम जयजयराम॥ ॥श्रीकृष्ण॥ ॥

अथपतिर्विभज्यते॥अनुकूलेत्यादिना॥तत्रानुकूलत्वंदर्शयति॥सार्वकालेति॥सर्वकालेभवंसार्वकालिकं सर्वकालमनुर
क्तः॥कदापिनविकूलइत्यर्थः॥शेषंस्पष्टं॥यथेतिदर्शयति॥पृथ्वीति॥सीतयाप्रस्थितःश्रीरामोवदति॥हेपृथ्वि त्वंकोमलाभव॥सी
तायाश्चरणकमलयोरतीवकोमलत्वात्॥हेदिनमणेसूर्यत्वंशैत्यंशीतलतांशैत्यतामंगीकुरु॥उष्णतापरिहारेत्यर्थः॥हेवर्त्म
न्मार्गत्वं लघुतांअल्पतांप्राप्नुहि॥हेपवनवायोत्वंखेदश्रमंमुंच दूरीकुरु॥हेदंडकाननगिरेदंडकयाराक्षस्याधिष्ठि
तवनंदंडकारण्यमित्यर्थः॥तत्वं बंधिनगिरेसान्निध्यंश्रयनैकट्यंकुर्वीत्यर्थः॥किंचमार्गाद्बहिर्गच्छमार्गंत्यजदूरेतिष्ठेत्य

अनुकूलदक्षिणधृष्टशठभेदात्पतिश्चतुर्धा॥ ॥सर्वकालपरांगनापराङ्मुखसत्वेसतिसर्वकालमनुरक्तोऽनुकूलः॥
यथा॥ ॥पृथ्वित्वंभवकोमलादिनमणेत्वंशैत्यमंगीकुरुत्वं वर्त्मन्लघुतांप्रयाहिपवनत्वंखेदमुत्सारय॥सान्नि
ध्यंश्रयदंडकाननगिरेनिर्गच्छमार्गाद्बहिःसीताऽसौविपिनंमयासहयतोनिर्गन्तुमुत्कंठते॥१७॥ ॥सकलनायि
काविषयसमसहजानुरागोदक्षिणः॥ ॥यथा॥ ॥एतत्पुरःस्फुरतिपद्मदृशांसहस्रमक्षिद्वयंकथयकुत्रनिवे
शयामि॥इत्याकलय्यनयनांबुरुहेनिमील्यरोमांचितेनवपुषास्थितमच्युतेन॥१८॥ ॥७॥ ॥७॥ ॥

र्थः॥यतःअसौसीतामयासहनिर्गन्तुमुत्सहतेउत्कंठते वांछतीत्यर्थः॥शार्दूलविक्रीडितंवृत्तं॥१७॥अथदक्षिणंदर्शयति॥सक
लेति॥सकलनायिकाविषयकसमसहजानुरागोयस्यसस्तथातमुदाहरति॥गोपीजनमध्यसंस्थितंआत्मानंसखायंप्रतिब्रवीति॥
एतत्पद्मदृशांसुंदरीणांसहस्रंपुरःअग्रेस्फुटंप्रकाशते॥कुत्रकस्यांविषये अक्षिद्वयंनिवेशयामि॥त्वंकथय॥समानरागास्वेता
सुनेत्रद्वयं युगपन्निवेशयमितिप्रतिपत्तौप्रश्नः॥इतिआक लय्यचिंतनंकिंचित्कृतमित्यर्थः॥रतेरेकावस्थायांनीरसत्वंचित्यं॥
तथाचगीतगोविंदे॥श्लिष्यतिकामपिचुंबतीत्यत्रनीरसत्वं॥वसंततिलकच्छंदः॥१९॥ ॥७॥ ॥७॥ ॥७॥ ॥

रसमं-टी.
३५

अथ धृष्टं दर्शयति॥ भूय इति॥ कापि सखीं वदति॥ भूयो वारं वारं निःशङ्कं यथा स्यात्तथा कृतदोषोऽपि कृतापराधोऽपि भूयो भूयो निवारितो
ऽपि नात्रागन्तव्यमित्यादिना वचनेन भूयः प्रश्रयपरायणो दत्तमानः इत्यर्थः॥ यथेति धृष्टनायकमुदाहरति॥ बद्ध इति॥ मया हारैः करकमलयोर्ब
द्धोऽपि पुनः द्वारतो द्वारात् वारितोऽपि॥ स्वापं ज्ञात्वा पुनरुपगतः समीपं प्राप्तस्ततः दूरतः दूरात् दत्ता प्रेरिता दृष्टिर्येन स समयं ज्ञातुमिच्छती
ति भावः॥ पुनस्तल्पोपान्ते शय्यासमीपे मुक्तं स्रज अपि तं कनकवलयं कृता स्फुटं कृत्यादिति भावः॥ यद्दामुक्तं एव तस्यापि विरहेयाकृत्रा
त्या [illegible] ति त्वमित्यर्थः॥ अन्वेषयन्त्या अन्वेषणं कुर्वन्त्या मया पार्श्वे प्रसुप्तश्च धृष्टो दृष्टः॥ मराकान्ता छन्दः॥ ९९॥ अथ शठं दर्शयति॥

त

भूयो निःशङ्ककृतदोषोऽपि भूयो निवारितोऽपि भूयः प्रश्रयपरायणः स धृष्टः॥ ॥यथा॥ ॥बद्धो हारैः करकमलयोर्द्वार
तो वारितोऽपि स्वापं ज्ञात्वा पुनरुपगतो दूरतो दत्तदृष्टिः॥ तल्पोपान्ते कनकवलयं मुक्तमन्वेषयन्त्या दृष्टो धृष्टः
पुनरपि मया पार्श्व एव प्रसुप्तः॥ ९९॥ ॥कामिनीविप्रियकपटपटुः शठः॥ ॥यथा॥ ॥मौलौ दाम विधाय भा
लफलके व्यालिख्य पत्रावलीं केयूरं भुजयोर्निधाय कुचयोर्विन्यस्य मुक्तास्रजं॥ विश्वासं समुपार्जयन्मृगदृशः
काञ्चीनिवेशच्छलान्नीवीग्रन्थिमपाकरोति मृदुना हस्तेन वामभ्रुवः॥ १००॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

द्व

राम
३५

कामिनीत्यादि स्पष्टं॥ यथेति शठमुदाहरति॥ शठ इत्याध्याहारः॥ मौलौ शिरसि दाममालां विधाय कृत्वा पुनर्भालफलके
ललाटपट्टे पत्रावलीं व्यालिख्य॥ पुनर्भुजयोः केयूरं निधाय॥ पुनः कुचयोर्मुक्तास्रजं विन्यस्य मृगदृशो नायिकायाः
विश्वासं समुपार्ज्जयन् काञ्चीनिवेशच्छलात्॥ काञ्च्याः क्षुद्रघण्टिकायाः निवेशो यथा स्यात्तथा नापक्षेपस्तच्छलात् न
ध्याजात्॥ मृदुना रागैः करणरूपेण हस्तेन वामभ्रुवो वक्रभ्रुवो नीवीग्रन्थिं अपाकरोति॥ रन्तुमिच्छन्त्या परिहरतीत्यर्थः॥ ना
यकस्योत्तममध्यमत्वेन दक्षिणशठधृष्ट इति निरूपणीयत्वे॥ अत्र व्युत्क्रमस्तु धृष्टशठ इति समीचीनः पाठः॥ शार्दूलविक्रीडितं॥ १

माध

न नयनर ते

उपपतिं लक्षयति॥ आचारेति॥ आचारस्य प्राप्तौ दर्शितमार्गस्य हानिहेतुर्नाशहेतुरित्यर्थः॥ उपपतिमुदाहरति॥ शंकाशृंखलितेनेति॥
कामिनी च कामी च तयोस्तत्क्लिरतं अद्भुतमित्यर्थः॥ तदेवाह॥ यत्र रते शंकया शृंखलितैर्बद्धैर्नेत्रैस्तेन प्रेक्षते॥ तत्र वारते केयूरध्वनिना
भूरिअधिकं यामीनिरूप्या च कितं यथा स्यात्तथा नौक्लिष्यते नौलिंग्यते॥ यत्र वाअलग्ना दशनैर्यथा स्यात्तथा दशनैर्मर्दं मर्दं बिं
बाधरो नोपीयते॥ यत्र वा भणितं रतिकूजितं न विधीयते न क्रीयते॥ प्रच्छन्नकामत्वादिति भावः॥ शार्दूलविक्रीडितं वृत्तं॥ १०१॥ उपपति
श्चतुर्धा चतुःप्रकारः॥ अनुकूलाद्युक्तभेदैरित्यर्थः॥ परं तु तत्र तेषु शठत्वं नियतं निश्चितं॥ तेन अनुकूलादयो नियताः॥ अथ वेशि

आचारहानिहेतुः पतिरूपपतिः॥ ॥यथा॥ ॥शंकाशृंखलितेन नयनप्रांतेन न प्रेक्षते केयूरध्वनिभूरिभीतिच
क्रितं नो यत्र वाश्लिष्यते॥ नो वा यत्र दशनैरलग्यदशनं बिंबाधरः पीयते नो वा यत्र विधीयते च भणितं तत्क्लिरतं का
मिनोः॥ १०१॥ ॥उपपतिरपि चतुर्धा॥ ॥परं तु शठत्वं तत्र नियतं॥ ॥अनियताः परे॥ ॥बकुल वेश्यापभो
गरसिको वैशिकः॥ ॥यथा॥ ॥कांचीकलक्वणितकोमलनाभिकांतिपारावतध्वनितचित्रितकंठपालिं॥ उद्भ्रांत

व५ लोचनचकोरमनंगरंगमाशास्महे कमपि वारविलासवत्याः॥ ॥१०२॥ ॥८॥ ॥८॥ ॥८॥ ॥

कं दर्शयति॥ बकुलेति॥ अरम्यं बकुलं वक्रीत्यमरः॥ यथेति तमुदाहरति॥ कांचीति॥ काचित्स्वरवाय्यं वदति॥ वारविला
सवत्याः वेश्यायाः कमपि अनंगरंगं कामविलासं आशास्महे वांछामः॥ किंभूतं अनंगरंगं कांच्याः कलक्वणितेन मधुरस्फु
टध्वनिकोमलया मधुरनाभेः कांतिर्यस्मिन् तं॥ पुनः पारावतानां ध्वनितेन कूजितेन चित्रिता कंठपालिर्यत्र तं॥ नानाविधरति
कूजितमाधुर्यादिति भावः॥ पुनः उद्भ्रांतौ लोचनचकोरौ यत्र तं॥ मुखचंद्रचंद्रिकायान्यायमिति भावः॥ वसंततिलकं वृत्तं॥ १०२॥

71

या१ न२

रसमं॰टी॰ ३६

वैशिकं विभजते ।। वैशिकस्त्रिविधः स्पष्टं ।। तत्रोत्तमवैशिकं लक्षयति ।। दयितांऽइति स्पष्टं ।। यथेति तमुदाहरति ।। चक्षुरिति ।। कांतः पक्ष्मलं दृशा प्रशस्तानि पक्ष्माणि यस्यां तादृशी दृग्यस्यास्तस्याः नायिकाया शोणारविंदश्रियं शोणारविंदस्य रक्तकमलस्य श्रीः शोभाय स्मिन्नतं कोपोदये नेति भावः ।। नेत्रप्रांतमुद्वीक्ष्य उर्ध्वं दृष्ट्वा उच्चैरधिकं न जल्पति ।। स्मितं हास्यं च वितनुते न विस्तारयति न वा वीटीं गृह्णाति ।। किंतु तल्पोपांतं शय्यासमीपमुपेत्य प्राप्य [illegible] के भ्राजंती कपोलयोर्द्युतिर्यस्य सः केवलं एकं यथा स्यात्तथा आननेन शिरसा उपलक्षितः ।। मुक्तास्रजं गुंफति ।। तल्पोपांते प्रथनाती त्यर्थः ।। शार्दूलविक्रीडितं वृत्तं ।। १०३ ।। मध्यमं लक्षयति ।। प्रियाया इति ।।

पुल४

धम

वैशिकस्तूत्तममध्यमभेदात्त्रिधा ।। ।। दयिताया भयः प्रकोपेपि उपचारपरायणा उत्तमः ।। ।। यथा ।। ।। चक्षुः प्रांतमुद्वीक्ष्य पक्ष्मलदृशः शोणारविंदश्रियं नोच्चैर्जल्पति न स्मितं वितनुते गृह्णाति वीटीं न वा ।। तल्पोपांतमुपेत्य किंतु पुलकभ्राजत्कपोलद्युतिः कांतः केवलमाननेन शिरसा मुक्तास्रजं गुंफति ।। १०३ ।। ।। प्रियायाः प्रकोपमनुरागं वा न प्रकटयति चेष्टया मनोभावं गृह्णाति स मध्यमः ।। ।। यथा ।। ।। आस्यं यद्यपि हास्यवर्जितमिदं लास्येन वीतं वचो नेत्रं शोणसरोजकांति तदपि क्वापि क्षणं स्थीयतां ।। मालायाः करणोद्यमो मकरिकारंभः कुचांभोजयोर्धूपः कुंतलधोरणीषु सदृशः सायं तनो दृश्यते

रणो

राम ३६

स्पष्टं ।। यथेति तमुदाहरति ।। आस्यमिति ।। कश्चिन्मध्यमनायको नायिकां प्रति वदति ।। यद्यपि इदं [illegible]स्यं हास्यवर्जितं ।। पुनः लास्येन गीतादिना वचो वचनं वीतं रहितं ।। पुनः शोणसरोजस्य कांतिर्यस्मिन् तत् नेत्रं कोपेनेति भावः ।। तदपि क्वापि प्रदेशे क्षणं त्वया स्थीयतां ।। कोपं परित्यज्य मा दृशो विश्राम्यतामित्यर्थः ।। यतः सदृशास्त्वसायंतनः संध्याभवः इति सर्वत्र योज्यं ।। मालायाः करणोद्यमो दृश्यते ।। पुनः कुचांभोजयोर्मकरिकारंभः चित्रचरणविशेषः आभोगो विस्तारः ।। पुनः कुंतलधोरणीषु केशसमूहेषु धूपः अगरुचंदनादिभिरधिवासितः दृश्यत इति सर्वत्र संबंधः ।। सायंमालादि प्रसाधनं मत्संगप्राप्त्यर्थं ।। अत एवमुदासितायास्तव हास्यवर्जिता

अथाधमं लक्षयति॥ भयरूपेति स्पष्टं॥ यथेति तमुदाहरति॥ उदयतीति॥ काचित्सखीं वदति॥ हे सखि यस्य हृदि लज्जापि नैवोदय
ति॥ इण् गतावित्यस्य रूपं॥ नो अच्छति करुणापि मद्विषयिका दयेत्यर्थः॥ कोपि भीतिलेशो न च तस्य एवं भूतस्य करे पुनर [illegible] अतः प
रमपि॥ बकुलमुकुलानां कोशो मध्यभागस्तद्वत् कोमलांगी मां न नयेथाः न प्रापयेथाः॥ पुष्पिताग्रा छंदः॥१०५॥ प्रसंगादन्यद
प्याह॥ अवमानितश्च नार्या विरज्यते स लुभवेज्ज्येष्ठ इत्यादि भरतवाक्यात्मा [illegible] चतुरश्च वक्ष्यमाणलक्षणः॥ तयोः शठ एवां
तर्भावः॥ मानी यथेति तमुदाहरति॥ बाह्याकूतेति॥ हंतेति खेदे॥ वामभ्रुवः वामे मनोहरे भ्रुवौ यस्यास्तस्याः रूपयादीनाः दृष्टयः

भयरूपात् लज्जाशून्यः कामक्रीडायामकृतकृत्याकृत्यविचारोऽधमः॥ ॥यथा॥ ॥उदयति हृदि नै
व यस्य लज्जा न च करुणा न च कोपि भीतिलेशः॥ बकुलकुसुमकोशकोमलांगी पुनरपि तस्य करे
न मां नयेथाः॥१०५॥ ॥मानी चतुरश्च शठ एवांतर्भवति॥ ॥मानी यथा॥ ॥बाह्याकूतपरायण
तव वचो वज्रोपमेयं मनः श्रुत्वा वा च मिमां ममास्य विनयं व्याजाद्बहिः प्रस्थिते॥ प्रात[illegible] विलोक बीतर
ने परिहृतालापे विवृत्तानने प्राणेशे निपतंति हंत रूपणा वामभ्रुवो दृष्टयः॥ ॥१०६॥ ॥८७॥ ॥

प्राणेशे कांते निपतंति॥ विश्राम्य हे कांत तव वचो वचनं बाह्याकूतपरायणं बाह्यं बहिर्भवं यत् आकूतं अभिप्रायः तत्परायणं॥
तत्प्रधानं॥ मनो वज्रोपमेयं वज्रतुल्यं अतो वज्रो मनसा व वचनं सर्वं मिथ्येति भावः॥ इमां उक्तलक्षणां वाचं सुभाविनयं आ
पास्य त्यक्त्वा प्रातः प्रभाते व्याजात्केनचिन्मिषेणेत्यर्थः॥ बहिर्गृहादित्यर्थः॥ प्रस्थिते चलिते॥ पुनः वीतविलोकने वीतं त्यक्तं
विलोकनं येन तस्मिन्॥ [illegible] पुनः परिहृतः संरूअलापो प्रेम तस्मिन्॥ पुनः विवृत्तं परिवर्तं आननं येन तस्मिन्॥

रस मं. ३७

चतुरमुदाहरति॥ वागिति॥ वाग्व्यंग्यसमागमश्चेष्टाव्यंग्यसमागमश्चतुरः॥ तत्र वाचा व्यंग्यः समागमो यस्य सः वाग्व्यंग्यसमागमः॥
यथेति तमुदाहरति॥ तमोजटाल इति॥ कश्चिन्नायिकां प्रति वदति॥ हे शातोदरि शातं कृशमुदरं यस्याः सा तत्संबोधनं॥ निशा
याः काले समये तमोजटाले तमसा जटालः प्ररोहा यस्मिन् एवंभूते हरिदंतराले हरितां दिशां अंतराले मध्ये विनिर्गताया
स्तव वनानां निकटे नदीनां तटे कः सहा[illegible]यो घटेत॥ वस्तुतो हमेव चतुर इत्यर्थः॥ इंद्रवज्रोपेंद्रमिश्रितायादद्यादुप

वाक्चेष्टाव्यंग्यसमागमश्चतुरः॥ वचनव्यंग्यसमागमो यथा॥ ॥तमोजटाले हरिदंतराले काले
निशायास्तव निर्गतायाः॥ तटे नदीनां निकटे वनानां घटेत शातोदरि कः सहायः॥१०७॥ ॥चे
ष्टाव्यंग्यसमागमो यथा॥ ॥कांते कनकजंबीरं करे किमपि कुर्वति॥ अगारलिखितेभानौ बिंडुमिं
डुमुखी ददौ॥१०८॥

राम ३७

जातिश्छंदः॥१०७॥ चेष्टाव्यंग्यसमागमो यस्य तथेति तमुदाहरति॥ कांत इति॥ कांते कनकजंबीरं सुवर्णजंबीरफलं विरो
घं किमपि वैचित्र्यपूर्वकं करे हस्ते कुर्वति सति॥ नायिका अगारलिखितेभानौ गृहभित्तिलिखितचित्रसूर्ये बिंडुं तदर्शक
तया ददौ दत्तवती॥ एतेन भानोराच्छादकबिंडुदानेन सूर्यास्तमयसमये मया सह क्रीडासंकेत इति व्यज्यते॥ अनुष्टुप् छंदः॥१०८॥
स्रो२

प्रसंगादन्यदप्याह ॥ प्रोषितइति ॥ पातीतिपतिः स्वामी उपपतिर्वैशिकश्च प्रसेकं प्रोषितोभवति ॥ क्रमेणोदाहरणानीति ॥ प्रो
षितपतिमुदाहरति ॥ ऊरूरंभेति ॥ कश्चिद्विरही नायिकामनुस्मरन्नाह ॥ हंतेतिखेदे ॥ सा नायिका चेन्मय्युदितरसिमनह
दयेवर्ततइत्यर्थः ॥ तापस्य विरहजनितस्य शांतिः कथंन ॥ शांत्युपायमेवअभिनयपूर्वकमाह ॥ यस्याः नायिकायाउर्वादि
षु सर्वत्र संबंधः ॥ ऊरूरंभाकदली ॥ दृगपिदृष्टिरपि कमलं ॥ केशपाशाः केशसमूहः ॥ पाशाः पक्षश्च हस्तश्च कलापोर्थाः क

प्रोषितपतिरुपपतिर्वैशिकश्च भवति ॥ ॥ क्रमेणोदाहरणानि ॥ ॥ ऊरूरंभादृगपिकमलं शैवलं केशपा
शो वक्त्रं चंद्रो लपितममृतं मध्यदेशो मृणालं ॥ नाभिः कूपो वलिरपि सरित्पल्लवः किं च पाणिर्यस्याः सा चेदु
रसि न कथं हंत तापस्य शांतिः ॥१०९॥ यां त्याः सरः सलिलकेलिकुतूहलाय व्याजादुपेत्य मयि वर्त्मनि
वर्तमाने ॥ अंतस्मितद्युतिचमत्कृत दृक्तरंगैरंगीकृतं किमपि वामदृशः स्मरामि ॥११०॥ ॥७॥

चांत्पर इत्यमरः ॥ वक्त्रंमुखं चंद्रः लपितं वचनं अमृतं ॥ मध्यदेशो मृणालं बिसं ॥ नाभिः कूपः ॥ वलिरपि त्रिवलिरपि सरि
त् ॥ किं च पाणिः पल्लवः ॥ इत्थं शीतलसामग्र्यां सत्यामपि मत्तापशांतिर्नभवति ॥ मद्भाग्यविपर्यय एवेत्यर्थः ॥ मंदाक्रांताछं
दः ॥१०९॥ उपपतिं प्रोषितमाह ॥ यां त्याइति ॥ सलिलकेलिकुतूहलाय सरः सरोवरं यां त्याः वामदृशः सुंदरदृशो व्याजात्
किंचिदुद्दिश्येत्यर्थः ॥ उपेत्य समीपमागत्य वर्त्मनि वर्तमाने मयि अंतःस्मितद्युतिभिः चमत्कृताः ये दृक्तरंगास्तैरंगीकृतं स्वी

शैवलं

कृतं संकेतितं किमपि

मित्यावसंततिलकं छंदः ॥११०॥

वैशिकं प्रोषितपतिमाह॥ अधृतेति॥ पुरसुदृशो वेश्यायाः स्मरचेष्टितं स्वीकृतं स्मरामि॥ किंभूतं अधृत नक्षत दुकूलः परिपतितो निचोलस्य बंधो ग्रंथिर्यस्मिन्॥ पुनः मुषितनश्चोरितो न कारो यत्र तत्॥ पुनः वक्रो अकुटिलो दृष्टिपातो यत्र तत्॥ पुनः उन्नतं आस्यबिंबं मुखमंडलं यत्र तत्॥ अधृतादिपुसर्वत्र धृष्टत्यादिति भावः॥ पुष्पिताग्रा छंदः॥ १११॥ पुनः प्रसंगादन्यदप्याह॥ अनभिज्ञ इति॥ संकेतादिचेष्टितं अभिसमंतात् न जानतो एवंभूतो नायको नायकाभासः॥ नायकवत् आभासत इति॥ तमुदाह

अधृतपरिपतन्निचोलबंधं मुषितनकारमवक्रदृष्टिपातं॥ प्रकटहसितमुन्नतास्यबिंबं पुरसुदृशः स्मरचेष्टितं स्मरामि॥ १११॥ ॥ अनभिज्ञो नायको नायकाधम एव॥ ॥ श्वश्रूस्त्वे सद्मनि यो जिता बहुविधा भंगीभंगिर्जनं पुष्पव्याजमुपेत्य निर्गतमथ स्फारीकृता दृष्टयः॥ तांबूलाहरणछलेन विहितौ व्यक्तौ च वक्षोरुहा वेतेनापि न वेत्ति हंति क्रियता यत्नेन स ज्ञास्यति॥ ११२॥ ॥८॥ ॥८॥ ॥८॥ ॥

रति॥ श्वश्रूस्त्व इति॥ कापि दूतीं वदति॥ हे इति श्वश्रूस्त्वे सद्मनि गृहे बहुप्रकारा भंगीभंगिचेष्टा नायो जिता कृते त्यर्थः॥ पुनः निर्जनं जनरहितं वनं पुष्पव्याजेन उपेत्य प्राप्य निर्गतं बहिर्निस्सृतं मयेति शेषः॥ पुनः दृष्टयः स्फारीकृताः विकसिताः॥ पुनः तांबूलस्य हरणछलेन ग्रहणमिषेण वक्षोरुहौ स्तनौ व्यक्तौ विहितौ॥ एतेनापि उक्तप्रकारेण न वेत्ति न जानाति॥ तर्हि क्रियता कालेन स नायकाभासो ज्ञास्यति॥ ममाभिलषितमित्यर्थः॥ शार्दूलविक्रीडितं छंदः॥ ११२॥ ॥ श्रीकृष्णाय नमः॥ ॥

प्रासंगिकमन्यदपि निरूपयति॥ नचेति॥ ते ते भेदा इति॥ उक्ता दश इति॥ तस्याः नायिकायाः अवस्थायाः भेद उक्तादिस्तद्भेदे न भेदाः विशेषः कालिको इत्यमरः॥ ते च नायकस्य स्वभावः प्रकृतः तद्भेदे न भेदाः॥ इति उभयोर्विशेषात्॥ केन स्वभावा इत्यत आह॥ अनुकूलत्वमित्यादि॥ अन्यश्चेत्यादि स्वीकर्त्तव्या इत्यस्यं तं स्पष्टं॥ तथा चेति॥ असंप्रदायात्॥ प्राचीनसंप्रदायाभावादित्यर्थः॥ कुत एतदित्याह॥ अन्येत्यादि॥ अन्यस्याः अपरस्याः समागमस्तस्य शंकावितर्कस्तेन धृष्टत्वं॥ अन्यस्याः संभोगसुखि

न च नायिका इव नायकस्य ते ते भेदाः संत्विति वाच्यं॥ ॥तस्याश्चावस्थाभेदेन भेदादिति विशेषात्॥ ॥अनुकूलत्वं दक्षिणत्वं धृष्टत्वं शठत्वमिति चत्वार एव नायकस्य स्वभावा इति॥ ॥अन्यश्च॥ ॥अवस्थाभेदेन यदि नायकस्य भेदः स्यात्तदा प्रोषितप्रलब्धखंडितादयो नायकाः स्वीकर्त्तव्याः॥ ॥तथा च संकेतव्यवस्थायां स्त्रीणामनागमने चासंप्रदायादन्यसमागमशंकाधृष्टत्वं वान्यसंभोगचिह्नितत्वं तन्नायकानां न तु नायिकानां॥ ताः प्रति त उद्भावने रसाभासापत्तेरिति॥ तेषां च नर्मसचीवः पीठमर्दकविटचेटविदूषकभेदाश्चतुर्धा॥ ॥७॥ ॥

त्वं वा नायकानां॥ न तु नायिकानामित्यर्थः॥ प्रस्तुतसंप्रदायमनादृत्येत्यर्थः॥ तत्र उद्भावने उद्घाटने रसाभासापत्तिः॥ शृंगारहानिप्राप्तिरिति॥ अनौचित्यादित्यर्थः॥ उक्तं हि॥ अनौचित्यादृते नान्यद्रसभंगस्य कारणमिति॥ ॥प्रासंगिकमन्यदप्याह॥ तेषामिति॥ तेषां नायकानां नर्मणा अनुकूलहासादिव्यापारेण संचितीति योजयति॥ नर्मसचिवः॥ हास्यसखा इत्यर्थः॥ सचिव इति षच संधाने रूपादिप्रत्ययो साधुः॥ सः पीठमर्दादिभेदात् चतुर्धा चतुःप्रकारभेदात्॥ ॥७॥ ॥७॥

रसमं॰टी॰ ३९

पीठमर्दकमाह॥ कुपितेति॥ कुपिता चासौ स्त्री च स्त्रीचैर्भितां प्रसादयतीति प्रसादकः॥ प्रसादयि . ता पीठं चरणनिवेशस्था
नं मृद्नातीति सः कैमल्यौ नरचरणौ वाथ मत्रदत्तावित्यादि हास्येन स्पर्शनं भवतीत्यर्थः॥ यद्वा पीठं रंगशालादिस्वरूपेण गृह्णातीत्या
लोडयति॥ यथेति तमुदाहरति॥ कोयमिति॥ हे मानिनि अयं कोपविधिः कः आत्मनः प्रतिलब्धत्वात्॥ कुत्सितोयं परित्याज्य
इत्यर्थः॥ किंतु करुणारयोगर्भे मध्ये यस्य तद्वचो वचनं प्रयच्छ प्रिये प्रगटये इत्यर्थः॥ अत एव तद्वचः पीयूषद्रवः अमृतं वा

प्र ४

कुपितस्त्रीप्रसादकः पीठमर्दकः॥ ॥यथा॥ ॥कोयं कोपविधिः प्रयच्छ करुणागर्भं वचो जायतां
पीयूषद्रवदीर्घिकापरिमलैरामोदिनी मेदिनी॥ आस्तां वा स्पृहयालु लोचनमिदं व्यावर्त्तयंती मुहुः
यस्मै कुप्यसि तस्य सुंदरि तपोवृंदानि वंदामहे॥ ॥११३॥ ॥श्रीलक्ष्मीर्जयतितरां॥ ॥८७॥

राम ३९

या

हस्तस्पदीर्घिका तस्याः परिमलैर्गंधविशेषैर्मेदिनी भूमिः आमोदिनी जायतां॥ वा अथवा॥ हे सुंदरि आस्तां कोपविधिः॥ य
तः स्पृहालु स्पृहाशीलं इदं लोचनं नेत्रं मुहुर्वारंवारं व्यावर्त्तयंती॥ रज्याद्भुतमिव परावर्त्तयंती यस्मै कांताय कुप्यसि
तस्य तव कांतस्य तपोवृंदानि वंदामहे॥ निरवद्यं तत्तपःसमूहं विना तादृक्पात्रं सादय॥ अस्य अलभ्यत्वादिति भावः॥
यस्मै कुप्यसीति॥ क्रुधद्रुहेति सूत्रेण चतुर्थी॥ शार्दूलविक्रीडितं वृत्तं॥ ॥११३॥ ॥श्रीगोपीजनवल्लभाय नमः॥ ॥

विटं दर्शयति॥ कामतंत्रेति॥ कामस्य तंत्रं कामतंत्रं सिद्धांतं तस्य कला भेदनं तंत्र को विदो विटः प्रवीणो इति सेत्र प्रधाने सिद्धांतइ
ति विश्वः॥ यथेति तमुदाहरति॥ आयात इति॥ हे रुचो हरि कुमुदेश्वरश्चंद्रः आयात उदित इत्यर्थः॥ सर्वेश्वरः सर्वेषामीश्वरः
प्रेरकः मारुतो वायुर्विजयते॥ विशेषेण शीतलमंदसुगंधस्त्रिविधेन त्रयेण जयतीत्यर्थः॥ भैरवो भयनायकः विरहव्य
याज न कत्वा लूभृंगो भ्रमरः कूजति इतस्ततो गुंकार शब्दं कुर्वन् भ्रमतीत्यर्थः॥ प्राणेश्वरः प्राणवल्लभो निकटं न मुंचति॥ ततः
किमित्यत आह॥ एते कुमुदेश्वरादयः सिद्धरसाः सिद्धसपन्नो रसः शृंगारो यैस्ते प्रसूनविशिखः पुष्पबाणः काम इत्यर्थः॥ अन
वद्यः अनिंद्यः उत्सवस्तन्नद्रूप व्याधिना शाक वैद्य चिकित्सारसो यस्य सः॥ असोढ रुयमानोमान एव व्याधिस्तस्ये तस्मिन्नूतव

कामतंत्रकला कलापकोविदो विटः॥ ॥यथा॥ ॥आयातः कुमुदेश्वरो विजयते सर्वेश्वरो मारुतो भृंगः कूजति
भैरव न निकटं प्राणेश्वरो मुंचति॥ एते सिद्धरसाः प्रसूनविशिखो वैद्यो नवद्योत्सवो मानव्याधिरसौ हृच्चो देरिक
थंत्यद्येत सिद्धासयति॥१४॥ ॥संधानचतुरश्चेटकः॥ ॥यथा॥ ॥सा चंद्रसुंदरमुखी सचनंदसूनुर्दैवान्नि
कुंजभवनं समुपाजगाम॥ अत्रांतरे सहचरस्तरणौ कठोरे पानीयपानकपटेन सरः प्रतस्थे॥१५॥ ॥८॥

मनसि कथं केन प्रकारेण स्थास्यति न स्थास्यतीत्यर्थः॥ अथ रं चेस ग्रंथेषु कुमुदे स वैश्वर भैरव प्राणेश्वरेषु सिद्धेषु व्याधिर्न तिष्ठ
तीत्यर्थः॥ शार्दूलविक्रीडितं वृत्तं॥१४॥ चेटकं दर्शयति॥ संधानेति॥ संधाने संयोजने चेटकश्चतुरः॥ यथेति तमुदाहरति॥
सा चंद्रेति॥ सा प्रसिद्धा चंद्रवत् सुंदरमुखी नायिका स प्रसिद्धः सकलकलाभिज्ञो नंदसूनुर्नंदगोपतनयश्च दैवात् अनिर्दे
शेनेत्यर्थः॥ निकुंजभवनं कुंजगृहं समुपाजगाम॥ अत्रांतरेऽस्मिन्नवसरे उभयोर्मेलन समय इत्यर्थः॥ सहचरतीति स
हचरः सखा तरणौ सूर्ये कठोरे तीव्रे सति पानीयस्य जलस्य पानकपटेन सरस्तटाके प्रतस्थे॥ मयि प्रस्थिते तस्मिन् मिल

श्वा२५

रसमं॰टी
४०

विद्रूषकं दर्शयति॥अंगारी नीतिस्पष्टं॥ यथेति तमुदाहरति॥आनीयेति॥ कश्चिन्नायको वयस्यं प्रति वदति॥ नीरजमुखी नायि
का शयनोपकंठं शय्यासमीपमानीय कुचकंचुकमोचनाय उत्कंठितोस्मि॥ अत्रांतरे विद्रूषकेन प्रातस्तनः प्रातर्भवतरुणाकु
क्कुटनादो मुर्मुहुः कुर्वारंवारं अकारि कृतः॥ तथा चेष्टितस्यार्धरात्रेपि प्रभातभ्रांत्या हास्यकारित्वात्॥ शार्दूलविक्रीडितं वृत्तं॥
॥११६॥ एवं शृंगाररसं निरूप्य सात्विकभावान्दर्शयति॥ स्वेदस्तंभ इति॥ यथेति॥ सर्वानपि विस्तरभयात् एकेनैव पद्येन दर्शय
पि५
ति॥ भंगोवाचीति॥ वाचि सात्विकभावयुतां गोपी पृच्छति॥ हे सुंदरि सप्रसिद्धः कोटिकंदर्प . . लावण्यः व्रजेंद्रस्य नंदस्य तनयः पु

अंगादिवैकृत्यैर्हास्यकारी विद्रूषकः॥ ॥यथा॥ ॥आनीय नीरजमुखी शयनोपकंठमुत्कंठितोस्मि कुच जे८
चुं२
कंचुकमोचनाय॥ अत्रांतरे मुहुरकारि विदूषकेन प्रातस्तनस्तरुणकुक्कुटकंठनादः॥११६॥ ॥स्वेद
स्तंभोथ रोमांचः स्वरभंगोथ वेपथुः॥ वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्विकाः मताः॥११७॥ ॥यथा॥
भंगो वाचि दृशोर्जलं कुचतटे स्वेदः प्रकंपोधरे पांडुर्गंडतटी वपुः पुलकितं लीनं मनस्तिष्ठति॥ स्मेरां
भोजविलोचन श्रवणयोस्तंभः समुज्जृंभते तत्किं राजपथे निजाम धरणीपालोयमालोकितः॥११८॥
त्रः हृदयस्त्वया किमालोकितः दृष्टः॥ यतो वाचि वाग्विषये भेदः॥ स्वरभंगो गद्गद इत्यर्थः॥ समुज्जृंभते प्रकाशते इति मनो विना
पदेषु योज्यं॥ दृशोर्नेत्रयोर्जलं आनंदाश्रु कुचतटे स्वेदः अतिकठिनमपि कुचतटं प्रस्वेदयुक्तमित्यर्थः॥ अधरे प्रकंपः चुंबन
लालसत्वेन। धैर्यवतोऽधरस्य कंपनमित्यर्थः॥ गंडतटी पांडुः तद्विरहतापात् कपोलस्थलं वैवर्ण्यमित्यर्थः॥ वपुर्गात्रं
पुलकितं तत्स्मरणानंदादिति भावः॥ मनः लीनं मग्नं चेष्टितं तिष्ठति॥ प्रलापो येन चेष्टा इत्यमरः॥ नयनश्रियो नेत्रलक्ष्म्याः आ
लस्यं तरवलोकनव्यतिरेकेणान्यत्र दर्शनायोग्यता॥ पुनः श्रवणयोर्जडता सकलकलाविधेस्तत्सदृशस्याव लोकनं विनैव

नाट्यशाला वकुलकुरबकाद्यास्माभावः॥ लज्जाकुल्मानेकारः॥
शार्दूलविक्रीडितं॥११७॥

र
४

८१

अथस्थायिभावंदर्शयति॥रतीति॥रतिःस्थायिभावोयस्यसश्रृंगारः॥तथाचभरतः॥रतिर्हासिश्चेत्यादिश्च॥सचश्रृंगारोद्विविधः॥
द्विविधाप्रकारोयस्यसः।संयोगविप्रलंभतया।नसंयोगः॥संयुक्तयोःस्त्रीपुंसयोरालिंगनादिरूपःसंयोगः॥विप्रलंभःवियुक्त
योरभीष्टप्राप्तिस्तयोर्वियोगः॥तत्रसंयोगोयथेतिसंयोगमुदाहरति॥वियतीति॥वियतिअंतरिक्षेजलदोमेघोविलोलति
लुलविमर्दे धातुः॥विधुश्चंद्रःस्खलतिलेपततिचेष्टतेचलति॥कपोतःपक्षीकूजतिशब्दायते॥तारकाणांनक्षत्राणांततिःस
मूहोनिपतति॥अमरवाहिन्याःगंगायाःवीचिस्तरंगआंदोलति॥आंदोलइवाचरति॥चुरादेरनित्यण्यंतात्वणिजभावः॥प्र
स्तुतेर्थेजलदादीनामनुर्पर्यंअंगात्जलदेनश्रमजलयुतकेशपाशोनायिकायाःविधुनामुखचंद्रःकपोतकूजनेनकंठध्व
च१ रतिस्थायिभावःश्रृंगारः॥ ॥सद्विविधः॥ ॥संभोगोविप्रलंभश्च॥ ॥संभोगोयथा॥ ॥वियतिविलोल
तिजलदःस्खलतिविधुश्चलतिकूजतिकपोतः॥निप ततितारकाततिरांदोलति वीचिरमरवाहिन्याः॥१८॥
निःनक्षत्रनिपतनेनहारलदिः॥केशग्रथितपुष्पपातोवा॥गंगावीच्यामुक्ताहारलताञ्रोटनं॥उपरिवर्त्ति[illegible]मानत्वादमरवा
हिनीतिविशेषणं॥एतेनविपरितरतिरूपःसंभोगोध्वन्यते॥अर्याकेदोगीतिछंदः॥१९८॥विप्रलंभोयथेतिमुदाहरति॥प्रादुर्भू
तइति॥कापिसखीविरहिणांप्रियंवदति॥हेविरहिन्॥त्वत्पथंतवपंथाःस्तत्पथःतंद्रष्टुकामाःपंकेरुहदृशाःकमलपत्रनेत्रायाः
नायिकायाःप्राणाःकंठदेशंप्रयांतिप्रकर्षेणप्राप्नुवंति॥अन्यद्वातवमुखविधुंमुखचंद्रंद्रष्टुंचक्षुर्नेत्रं[illegible]उड्डीयगंतुमशा
कं॥पल्लवस्यच्छलेनकिंपक्षंसृजति॥अन्यथावक्षसिउड्डीनासंभवात्॥बिसिनीपद्मिनी॥मुखाइत्समरः॥अत्रोत्प्रेक्षाल
कारः॥मंदाक्रांताछंदः॥१९॥ ॥शोधोत्तलस्य॥ ॥विप्रलंभोयथा॥ ॥प्रादुर्भूतेनवजलधरेत्वां द्रष्टुकामाःप्राणाःपंकेरु
नं
याः४ त्पथं१ दल४

ह दल दृशः कंठदेशंप्रयांति॥अन्यल्लिंगात वमुखवि
धुं दृष्टुमुड्डीयगं कुंचक्षः पक्षंसृजति बिसिनीपल्लव

मे५

गोर

82

रसम-टी
४१

विप्रलंभे चाभिलाषादयो दशावस्था भवंति॥ ताः स्वयमेव स्पष्टयति॥ तत्रेति॥ तत्र तासु संगमस्य मिलनस्य इच्छाऽभिलाषः॥ यथे
ति तं लक्षयति॥ तस्यामिति॥ कश्चित्पूर्वानुरागी नायको वदति॥ तस्यां प्रसिद्धायां नयनलावण्यादियुतायामित्यर्थः॥ तनुरेव स
रसी सरस्तस्यां चेतो नयनं च निःपतितमग्नं॥ तत्र चेतो मानसं गुरु अतो निमीलनं नयनं लुनत्पुसर्वतोभ्रमति॥ मग्नेन स्तस्यामे
वमग्ने नेत्रं दर्शनलावण्यलालसं तदुपर्येव भ्रमतीत्यर्थः॥ आर्याभेद उपगीतिः॥१९०॥ चिंतामाह॥ दर्शनं च संतोषश्च तौ तयोः

विप्रलंभे चाभिलाषश्चिंता स्मृतिगुणकीर्तनोद्वेगप्रलापोन्माद व्याधिजडतानिधनानि दशावस्था भवंति॥ ॥
विप्रलंभे चाभिलाषश्चिंता स्मृतिगुणकीर्तनोद्वेगप्रलापोन्माद व्याधिजडतानिधनानि दशावस्था भवंति॥ चेतो गुरु विनिमग्नेल
तत्र संगमेच्छाऽभिलाषः॥ ॥ यथा॥ ॥ तस्यां सुतनु सरस्यां चेतो नयनं च निःपतितं॥ चेतो गुरु विनिमग्नेल
घु नयनं सर्वतो भ्रमति॥१९॥ ॥ स दर्शनसंतोषयोः प्रकारजिज्ञासा चिंतनं॥ यथा॥ ॥ मया विधेयो मुकु
रघ तस्मिन्कुंजोपकंठे कलकंठनादः॥ राधा मधो विभ्रममावहंती कुर्वत नेत्रोत्पलतोरणानि॥ ॥१९१॥

प्रकारस्य प्रतिक्रियायाः जिज्ञासा ज्ञातुमिच्छा तस्याश्चिंतनं स्मरणं॥ चिंता यथेति तामुदाहरति॥ मयेति॥ मया तस्मिन्कुंजो
पकंठे कुंजसमीपे ऽघ कलकंठानां कोकिलानां नादो विधेयः कर्तव्यः॥ यतः राधा कर्तृ मधौ वसंते तस्य विभ्रमं भ्रांतिं वहंती॥
नेत्रोत्पलतोरणानि नेत्रे इतस्ततश्चलिते न संतदर्शनार्थं तेएव तोरणानि वंदनमालाः कुर्वत॥ विभ्रमो भ्रांतिहावयोरिति॥ मे

[illegible] ॥१९॥

अथ स्मृतिं दर्शयति॥ प्रियाश्रितेति॥ प्रियं इष्टं तदाश्रितया उद्बोधितोयः संस्कारस्तज्जन्या स्मृतिः॥ यथेति तामुदाहरति॥ राम इति॥ लक्ष्मणस्य कृतदीर्घदुःखं [illegible] ते न चकितो व्याकुलो रामो व्यथां दुःखं न आविःकरोति न प्रकटयति॥ यतः श्वासं उद्गम तरं अत्युच्चं न जहाति॥ वा अथवा चक्षुषि जाता वेकवचनं नेत्रयोः सलिलं न धत्ते नेत्राश्रु न दधतीत्यर्थः॥ किंतु विदेहराजो जनकस्तस्य तनयां सीतां भूयो वारं वारं स्मरन्वर्तते तिष्ठतीत्यर्थः॥ किंभूतो रामः॥ वातावर्तेन वातभ्रमेण निवर्तमानो दहनो ऽग्निस्तद्वत्क्रूरैरनंगज्वरैः कामसंतापैः क्षामः जीर्णः॥ शार्दूलविक्रीडितं वृत्तं॥१२२॥ गुणकीर्तनं दर्शयति॥ विरहेति॥ विर

प्रियाश्रितचेष्टाद्युद्बोधितसंस्कारजन्यज्ञानं स्मृतिः॥ ॥यथा॥ रामो लक्ष्मणदीर्घदुःखचकितो नाविःकरोति व्यथां श्वासं नोत्तमतरं जहाति सलिलं धत्ते न वा चक्षुषि। वातावर्तविवर्तमानदहनक्रूरैरनंगज्वरैः क्षामः किं तु विदेहराजतनयां भूयः स्मरन्वर्तते॥१२२॥ ॥विरहकालिनकांताविषयप्रशंसा प्रतिपादनं गुणकीर्तनं॥ ॥यथा॥ ॥स्पर्शः स्तनतटस्पर्शो वीक्षणं वक्त्रवीक्षणं। तस्याः केलिकथालापसमयः समयः सखे॥१२३॥

हकालीनं विरहभवं कामविषये यत्प्रशंसायाः स्तुतेः प्रतिपादनं गुणकीर्तनं॥ संभोगेपि गुणकीर्तनविहाराय विरहकालीनेति विशेषणं॥ यथेति तदुदाहरति॥ स्पर्श इति॥ कश्चन विरही वदति॥ हे सखे स्पर्शः स्पर्शनव्यापारश्चेत्तस्याः नायिकायाः स्तनतटस्पर्शः॥ वीक्षणं दर्शनव्यापारश्चेत्तस्याः वक्त्रवीक्षणं॥ समयः कालस्त्वापनं चेत्तस्याः केलिकथालापसमयो भवतीति सर्वत्र योज्यं॥ अनुष्टुप्छंदः॥१२३॥ ॥श्रीकृष्ण जय कृष्ण जय जय कृष्ण॥ ॥

री

रसमंजरी
४२

उद्वेगं दर्शयति॥ कामक्लेशेति॥ कामक्लेशेन जनितं यत् स्वकल्पविषयके हेयताज्ञानं स उद्वेगः॥ यथेति तमुदाहरति॥ कश्चिद्विरही वदति॥ इंदुबिंबं चंद्रबिंबं चंद्रमंडलं गरलद्रुमस्य विषवृक्षस्य कंदं मूलं॥ किंच वसंतः करुणाकरुणैव वारिजं कमलं तस्य वारणः गजइव वसंतो हिमकला नामभावो हि॥ किंच रजनी रात्रिः स्मरभूपते कामराजः कृपाणी कर्त्री शस्त्री कृपाणी कर्त्री सिमहत्त्यमरः॥ प्रस्तुतमाह॥ हे विधातः अतः परं किं करणीयं॥ किं ते वामसहत्यादिति भावः॥ औपच्छंदसिकछंदः॥ १२४॥

कामक्लेशाजनितसंकल्पविषयहेयताज्ञानमुद्वेगः॥ ॥यथा॥ ॥गरलद्रुमकंदमिंदुबिंबं करुणा वारिजवारणो वसंतः॥ रजनी स्मरभूपतेः कृपाणी करणीयं किमतः परं विधातः॥ १२४॥ ॥प्रियाश्रितकाल्पनिकव्यवहारः प्रलापः॥ कल्पनायाः कारणमंतःकरणविक्षेपः॥ तस्य च निदानमुत्कंठा॥ ॥यथा॥ ॥अर्द्धसंवीक्षणं चक्षुरर्द्धसंमननं मनः॥ अर्द्धसंस्पर्शनः पाणिर घमे किं करिष्यति॥ १२५॥ ॥औत्सुक्यसंतापादिकारितमनोविपर्यासमुग्धप्रियाश्रितव्यापारउन्मादः॥ ॥व्यापारः कायिको वाचिकश्च॥ ॥कायिको यथा॥ ॥प्रतिकूलममृतांशोः प्रेक्ष्य कांतो मृगाक्ष्याः मुखमिति परिहासं कर्तुमुत्कंठितोऽभूत्॥ अथ नियमितवाचो मानमाशंक्य तस्याः स्पृशति मुकुलभाजा पाणिपंकेरुहेण॥ १२६॥ ॥हरे राम हरे राम राम राम हरे हरे॥ ॥हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे॥ १॥ ॥

उन्मादमाह॥ प्रियेति॥ प्रियाश्रितकाल्पनिकव्यवहारः प्रलापः॥ कल्पनायाः कारणमंतःकरणविक्षेपः॥ तस्य च निदानमुत्कंठा॥ यथेति तमुदाहरति॥ अर्धसंवीक्षणं अर्धचक्षुः मीलनं॥ अर्द्धसंमननं मनः॥ अर्धसंस्पर्शनः पाणिर घमे किं करिष्यति॥ १२५॥ उन्मादं दर्शयति॥ औत्सुक्येति॥ औत्सुक्यसंतापादिकारितमनोविपर्यासमुग्धप्रियाश्रितव्यथाव्यापारउन्मादः॥ व्यापारः कायिको वाचिकश्चेति द्विधा॥ वाचिको यथा॥ प्रतीतो॥ १२७॥

वाचिकोयथेति॥ वास्त्येकमुदाहरति॥ किंरे विधोइति॥ रे विधो चंद्र किं दृप्यसि॥ मृगदृशो नायिकायाः मुखं अद्वितीयं निरूपमं पुनः रे कंदर्प काम दृप्यसि॥ मृगदृशाएतत् दृगंबुजं नेत्रकमलं अन्यत्त बं बाण॥ त्वा तु॥ एतत्कमलतुल्यं न भवतीति॥ किं गर्वं मा वहसीत्यर्थः॥ रे भृंग भ्रमर यादृक् झंकारमावहसि त्वाद्कं करोसि तादृक् तनुर्न॥ पुनः कर्माणि व्यापारान् अधिकृ निंद्यानित्यर्थः॥ कृशा तनुस्तन्वी कृशांगीत्यर्थः॥ क्व पुनः ईदृशी ईक्षणीयं दर्शनीयं वस्त्वित्यर्थः॥ वसंततिलकछंदः॥१२७॥ व्याधिं दर्शयति॥ मदनेति॥ मदनवेदनासमुत्थो यः संतापकार्श्यादिदोषः स व्याधिः॥ यथेति तमुदाहरति॥ कोदंडमिति॥ कापि दूती नायिकं

वाचिकोयथा॥ ॥ किंरे विधोमृगदृशो मुखमद्वितीयं कंदर्प दृप्यसि दृगंबुजमन्यदेव॥ झंकारमावहसि भृंग तनुर्न तादृक् कर्माणि धिक् च पुनरीदृशमीक्षणीयं॥१२७॥ ॥ मदनवेदनासमुत्थसंतापकार्श्यादिदोषो व्याधिः॥ ॥यथा॥ ॥ कोदंडं विशिखो मनो निवसतं कामस्य तस्याअपि भ्रूवल्ली नयनांचलं मनसि ते वासः समुन्मीलति॥ इत्थं साम्यविधौ तयोः प्रवदति स्वामिंस्तथास्त्रिह्यतां तन्वाना तनुतां क्रमादतनुतां नैषाय था

प्रतिवदति॥ भो स्वामिन् कामस्य कोदंडं धनुः विशिखो बाणः मनो निवसनः॥ मनसि वासश्चेति त्रितयं समुन्मीलति समुज्जृंभते॥ तस्या अपि भ्रूवल्ली भ्रूलता धनुः तथा नयनांचलं नेत्रकोणः एतेन विशिखः ते मनसि वासश्चेति त्रितयं इत्थं तयोः कामसख्योः साम्यविधौ कोदंडादि भ्रूवल्ल्यादि समत्वे भवति सति तथा क्रमात् अवस्थाभेदेन स्निह्यतां प्रेम क्रियतां॥ यथा एषा मत्सखी तनुतां कृशतां तन्वाना विस्तारयंती अतनुतां अनंगत्वं गच्छति॥ यथा कामोऽनंगस्तथा इयं तस्यादिति भावः॥ शार्दूलविक्रीडितं वृत्तं॥१२८॥

॥१२९॥

जडतां दर्शयति॥ विरहेति॥ विरहव्यथाविः करणवैद्यजीवनावस्था जडता॥ यथेति तामुदाहरति॥ पाणिरिति॥ स्वप्नचित्रसाक्षाद्भेदेन दर्शनं त्रिधा॥ स्वप्नदर्शनं यथेत्युदाहरति॥ मुक्ताहारमिति॥ चित्रदर्शनं यथा॥ नीवीमिति॥१३१॥ साक्षाद्दर्शनं यथेति तमुदाहरति॥ चेत इति॥ हे चेतः चंचलतां त्यज॥ हे प्रियसखि व्रीडे मां न पीडयेति॥ वांछितभंगादित्यर्थः॥ हे भ्रातः॥

विरहव्यथाविःकरणवैद्यजीवनावस्था जडता॥ ॥यथा॥ ॥पाणिमंद्रचकंकणस्तनतटी निःकंपमानांशुकादृष्टिर्निश्चलतारका समभवन्निस्तांडवं कुंडलं॥ कश्चिन्नार्पितया समं कलशात नो भेदो भवेन्नो यदि त्वन्नामस्मरणेन कोऽपि पुलकारंभः समुज्जृंभते॥१२९॥ ॥स्वप्नचित्रसाक्षाद्भेदेन दर्शनं त्रिधा॥ ॥स्वप्नदर्शनं यथा॥ ॥मुक्ताहारं न च कुचगिरेः कंकणं नैव हस्तात्कर्णाभ्यर्णाभरणमपि वा नीतवान्नैव तावत्॥ अद्य स्वप्ने वकुलमुकुलं भूषणं संदधानः कोऽयं चोरो हृदयमहरत्तन्चितं न प्रतीमः॥१३०॥ ॥चित्रदर्शनं यथा॥ ॥नीवीं हरेदुरसिजं विलिखेन्नखेन दंतच्छदं च दशनेन दशेदकस्मात्॥ इत्थं पटे खलु लिखितं दयितं विलोक्य बाला पुरेव न जहार विहारशंकां॥१३१॥ ॥साक्षाद्दर्शनं यथा॥ ॥चेतश्चंचलतां त्यज प्रियसखि व्रीडे न मां पीडय भ्रातर्मुंच दृशौ निमेष भगवन्कामक्षणं क्षम्यतां॥ बर्हं मूर्ध्नि कर्णयोः कुवलयं वंशं दधानः करे सोऽयं लोचनगोचरीभवति मे दामोदरः सुंदरः॥१३२॥

निमेष दृशौ मुंच॥ त्वयि स्थिते दर्शनांतरायादिति भावः॥ हे काम मदनक्षणं क्षम्यतां मे न सः पीडाकरणादित्यर्थः॥ यतः मूर्ध्नि बर्हपिच्छं कर्णयोर्नीलकमलं करे वंशं दधानः॥ सः प्रसिद्धः अयमित्यनुभवेन सुंदरो दामोदरः दाम उदरे यस्य सः श्रीकृष्णः यशोदया सानंददर्शनाय ॥कस्यचिदपराधाद्दाम्ना दुःखेन बद्धत्वात्॥ तदंकितोदरत्वेन भक्ताधीनत्वं दर्शितं॥ सो

यो लोचनं गोचरो न भवति नेत्रविषयो न भवतीत्यर्थः॥
दरः सुंदरः॥१३२॥
शार्दूलविक्रीडितं वृत्तं॥१३३॥

एवं ग्रंथं कृत्वा कवीन् प्रति वदति ॥ माध्वीकेति ॥ भो कवयः काव्यकर्त्तारः मम कृपया रसयुक्तमंजरी मंजरीवन्मंजरीं तां कर्णभूषणं कुर्वंतु ॥ किंभूतां ॥ माध्वीकं मधु तस्य स्यंदः श्रवणं तस्य संदोहस्तेन सुंदरीं तां सर्वतः कमनीयामित्यर्थः ॥ अनुष्टुप्छंदः ॥ पित्रादिकं प्रकाशयन् ग्रंथसमाप्तिं करोति ॥ तात इति ॥ यस्य कविकुलालंकारचूडामणिः गणेश्वरः तातः माता पिता यस्य सुरसरितो गंगाया कल्लोलैः किर्मीरिता चित्रिता विदेहभूर्जनकस्य भूमिदेशस्तेरनुक्तदेश इत्यर्थः ॥ तेन श्रीभानुना कविना कृतेन पद्येन श्लोकेन मंजरीनाम ग्रंथो योजितः कृत इत्यर्थः ॥ किंभूता ॥ वाग्देव्याः सरस्वत्याः कृतौक

माध्वीकस्यंदसंदोहसुंदरीं रसमंजरीं ॥ कुर्वंतु कवयः कर्णभूषणं कृपया मम ॥ १३३ ॥ ॥ तातो यस्य गणेश्वरः कविकुलालंकारचूडामणिर्देशो यस्य विदेहभूः सुरसरित्कल्लोलकिर्मीरितः ॥ पद्येन स्वकृतेन काऽपि कविता श्रीभानुना योजिता वाग्देवीश्रुतिपारिजातकुसुमस्पर्द्धाकरी मंजरी ॥ १३४ ॥ ॥ इति श्रीमद्भानुदत्तमिश्रविरचिता रसमंजरी समाप्तिमगमत् ॥ ॥ ॥ ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ ॥ ॥

र्थीय त्पारिजातकुसुमं कल्पलरुपुष्पं तस्य स्पर्द्धां करोतीति सा तत्तुल्येत्यर्थः ॥ [illegible] ॥ श्रीमद्द्राविडनीरदं बुधिविधुः श्रीमन्नृसिंहो भवद्वृंदः श्रीहरिवंश उत्तमगुणग्रामैकभूस्तत्सुतः ॥ तत्पुत्रस्य कृतिस्त्वयं विलसतां गोपालनाम्नो मुदं गोपीनाथपदारविंदमकरंदानंदचेतोनिलः ॥ १ ॥ मत्सरपरिहृतमनसां सुधियां पुरतः परिस्फुरत्वेषा ॥ रसिकललाटतटस्था रम्या रसमंजरी टीका ॥ २ ॥ ॥ तातः श्रीहरिवंशभट्टकृच्चरणगोपालभट्टकृता रसमंजरीटीका समाप्तिंगता ॥ ॥ १७१९ परिधाविनाम संवत्सरे शरदृतौ कार्तिकशुक्ले द्वादश्यां रात्रौ मेचक रसच्छवि स्वोपनाम

॥इतिरसमंजरीसटीकासमाप्ता॥

[OrderDescription]
,CREATED=30.09.20 11:01
,TRANSFERRED=2020/09/30 at 11:12:53
,PAGES=88
,TYPE=STD
,NAME=S0003774
,Book Name=M-1546-RASMANJARI STIKA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF

FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,